कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥श्रीगणेशायनमः॥ प्रणम्यपरमात्मानंबालधिवृद्धिसिद्धये सारस्वतिमृजुं
कुर्वेप्रक्रियांनातिविस्तराम् ॥ इंद्रादयोपियस्यांतंनययुः शब्दवारिधेः ॥ प्रक्रियां
तस्यकृत्स्नस्यक्षमोवक्तुंनरः कथम् ॥ समुद्रवत्व्याकरणंमहेश्वरंतद्रूकुंभोद्ध
रणंबृहस्पतौतद्भागभागावसतंपुरंदरेकुशाग्रबिंदुग्रथितंहिपाणिनौ ॥३॥
तत्रतावत्संज्ञासंव्यवहारायसंगृह्यते ॥ अइउऋऌसमानाः ॥ अनेनप्रत्याहा
रग्रहणायवर्णपरिगण्यंते तेषांसमानसंज्ञाचविधीयते ॥ ने तेषुसूत्रेषुसंधि
रनुसंधेयो विवक्षितत्वात् अविवक्षितस्य संधिर्नभवतीति नियमात् लोकि
कप्रयोगनिष्पत्तयेसमयमात्रत्वात्तच्च ॥ ह्रस्वदीर्घप्लुतभेदाःसवर्णाः ॥ एतेषांह्र
स्वदीर्घप्लुतभेदाः परस्परंसवर्णाभण्यंते लोकाच्छेषस्यसिद्धिरितिवक्ष्यति त
तोकतएवह्रस्वादीसंज्ञाज्ञातव्या एकमात्रोह्रस्वः द्विमात्रोदीर्घः त्रिमात्रो

प्लुतः व्यंजनंचार्द्धमात्रकम् एषाममप्युदात्तादिभेदाः संति उच्चैरुपलभ्यमानउ
दात्तः नीचैरनुदात्तः समवृत्त्यास्वरितः सानुनासिकोनिरनुनासिकश्च ॥ एऐओऔ
संध्यक्षराणि ॥ एषांह्रस्वानसंति उभयेस्वराः अकारादयः पंचचत्वारएकाराद
यः उभयेस्वराउच्यंते ॥ अवर्ज्जानामिनः ॥ अवर्णवर्ज्जाःस्वरानामिनउच्यंते अनु
क्रांतास्तावत्स्वराः प्रत्याहारंजिघृक्षुर्यथाव्यंजनान्यनुक्राम्यति हयवरल ञण
नङम झढधघभ जडदगब खफछठथ चटतकप शषस ॥ आद्यंताभ्यांप्रत्या
हारंजिघृक्षता आद्यंताभ्यामेतेवर्णाग्राह्याः आदिवर्णोंतेनसहगृह्यमानस्तन्ना
मप्रत्याहारः तथाहि अकारोबकारेणसहगृह्यमाणो बप्रत्याहारःसर्वोच्यते
अइउऋऌएऐओऔहयवरल ञणनङम झढधघभ जडदगब ॥ इत्येतावत्संख्या
कःसंपद्यते चटतकप इतिचपप्रत्याहारः जडदगब इतिजबप्रत्याहारः झढधघ

Acc. No. 2078. M819
शीर्षक - तद्धितप्रक्रिया (सारस्वत)
काल - संवत 1869
विषय - व्याकरण
लेखक - गोस्वामी उच्छापुरी

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M-819
Dist Nagpur

म इति ङम प्रत्याहारः ञणनङम इति ञम प्रत्याहारः एवं यत्र यत्र येन येन प्रत्या
हारेण कृत्संस तत्र ग्राह्याः । प्रत्याहाराणां संख्या नियमस्तु । हसा व्यंजनानि हका
रादयः सकारांता वर्णा हसा व्यंजनानि भवंति स्वरहिनं व्यंजनं तेषु कारः सुखमु
खोच्चारणार्थं त्वादित्संज्ञकः । कार्यायेत् । प्रत्ययाद्यतिरिक्तकस्मैचित्कार्याय उ
च्चार्यमाणो वर्ण इत्संज्ञो भवति । यस्येत्संज्ञा तस्य लोपः । वर्णादर्शनं लोपः । वर्ण
विरोधी लोपश्च मित्रवदागमः । शत्रुवदादेशाः । स्वरानंतरिता हसाः संयोगाः ।
कुचुटुतुपु वर्गाः । उकारः पंचवर्णपरिग्रहणार्थः । अरेदो नामिनो गुणः । नामिनः
स्थानकाः अर् एल् ओ ल् एते गुणसंज्ञका भवंति । आरैऔ वृद्धिः । आ आर ऐ
औ एते वृद्धिसंज्ञका भवंति । अंत्यस्वरादिष्टिः । अंत्यो यः स्वरस्तदादि वर्णष्टि
संज्ञो भवति । अंत्यात्पूर्व उपधा । अंत्यात्वर्णमात्रात्पूर्वो यो वर्णः स उपधासं

ज्ञको भवति । असंयोगादि परो ह्रस्वो लघुः विसर्गानुस्वारसंयोगादि परो दीर्घश्च
गुरुः मुखनासिकाभ्यामुच्चार्यमानो वर्णः सानुनासिकः । द्विबिंदु विसर्गः शिरो
बिंदुरनुस्वारः । वर्णग्रहणे सवर्णग्रहणं अकारग्रहणे केवलस्येव ग्रहणं तप
रकरणं तावन्मात्रार्थः । इति संज्ञाप्रक्रिया । अधुना स्वरसंधिरभिधीयते । इय
स्वरे इवर्णो यत्वमापद्यते स्वरे परे यस्य भावो यत्वं । दधि आनय इति स्थिते ।
दध्य आनय इति तावद्भवति । हसे हसः । स्वरात्परो रेफहकारवर्जितो हसो ह
से परे द्विर्भवति । इति धकारस्य द्वित्वं पुनर्द्वित्वे प्राप्ते । द्वित्वविधानाद्वा एवं सि
ध्यते अन्ते हसा लुप्यतं । झभे जबाः झसानां झभे परे जबा भवंति । इति पूर्वधकारस्य
दकारः । सवर्णत्वाद्वर्गो वर्गेण सवर्णः इति वचनात् । यथासंख्यं वा वक्तव्यः ।
स्वरहीनं परेण संयोज्यं । दध्यानय इति सिद्धं । नक्तं न रुच्यतेस्माकं दुग्धं चम

२० घरायते अन्नसंरोचनार्थीय रव्यानयवरानने १ गोरी अत्र इतिस्थिते रायो
द्विः स्वरपूर्वो द्विफा सरोयपो द्विर्भवति जजतं तु विकाम्पायेनर फसोऽहं गमनं अ
ग्रेरेफ अधोयाति पाषाणमिव चांवरी पश्चाइपस्पउ ईत्वं तु विकाफलमिवां
नसि १ अरह इति विशेषणानरेपस्य द्वित्वं गोर्यत्र हरि अत्र हर्यत्र हरिरनु
नुभव: हर्य्यनुभव: नह्यस्ति स्वर इत्यनुवर्त्तते एवमन्यत्रापि यत्र स्त्र्याक्षरे
न कार्यसिद्धिस्तत्र सर्वत्र स्त्रांतरासन्नांतरादनुवृत्तिर्ज्ञातव्या ग्रंथभूयस्त्व
नयान्नास्माभिर्लिख्यते उं उवर्णो वत्वमापद्यते स्वरे परे मधु अत्र मध्वत्र
ऋ रं ऋवर्णो रत्वमापद्यते स्वरे परे पितृ अर्थः पित्रर्थः मातृ अंस: मात्रं
स: लृ लं लृवर्णो लत्वमापद्यते स्वरे परे लृ अनुबंधः लनुबंधः एअय एका
रोऽयप भवति स्वरे परे ने अनं नयनं ओ अव ओकारो अव भवति स्वरे ३

परे लो अनं लवनं गो अति भवति गवादेरवर्णागमो क्षादौ वक्तव्य: गो अश्व:
गवाश्व: गो इन्द्र: गवेन्द्र: गो अग्रं गवाग्रम् गो अजिन गवाजिनं स्वइरं स्वै
रं स्वइरणी स्वैरणी अक्षउहिनी अक्षौहिनी अयुतं हि नागास्त्रिगुणीरथानिल
क्षैकपो धादश्चालक्षवाजी पदातिजातिषट्त्रिंसकोटि अक्षौहिणीतांमुनयो
वदंति प्रउढ इति स्थिते गवादेरनुस्य वल विरोधे न प्रकार्यं स्यात् उं ओ आ औ
औ प्रोढ: स्त्रिचेति प्रौढि गवाक्ष अश्व गवेंद्र अग्र गवाग्रं च गवाजिनं स्वैरमक्षौहिनीप्रौ
ढ एते प्रोक्ता गवादय: गवाक्ष गवेन्द्रयोर्नित्यमवर्णागम: इतरपते गवाजिनस्य विक
ल्पेन गवाग्रं च नत्वेव चर १ क्वचित्स्वरवद्यकार: यथाध्वपरिमाणे गोयूति गव्यू
ति स्त्री क्रोशयुगं गव्यूतिरिति अमर: अस्य गवां मिश्रीभावो गोयूति ऐ आ
य् ऐकारो आय भवति स्वरे परे नै अक: नायक: औ आव् औकारो आव भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वति स्वरे परे तोइह ताविह य्वोर्लोपश्च वा पदांते पदांते स्थितानामयादीनां य
कारयोर्लोपश्च वा भवति ते आगता त आगता तयागता पटो इह पटविह प
ट इह तो इमौ ताविमौ ता इमौ असो इंदुः असाविंदुः असा इंदुः हे स्व इति
हे सखयिति हे सख इति लोपस्ति पुनर्न संधिः छंदसि तु भवति हे सखेति एदो
तोतः पदांते स्थितादेकारादोकाराच्च परस्याकारस्य लोपो भवति ते अत्र तेत्र
पटो अत्र पटोत्र प्रभो अत्र प्रभोत्र सवर्णे दीर्घः सह सवर्णस्य सवर्णे परे सः
दीर्घो भवति दधि इह दधीह भानु उदयः भानूदयः अदीर्घो दीर्घतां याति ना
स्ति दीर्घस्य दीर्घता पूर्वं दीर्घस्वरं दृष्ट्वा परलोपो विधीयते १ सामान्यशास्त्रतो नु
नं विशेषो बलवान्भवेत् परेण पूर्वबाधो वा प्रायशो दृश्यतामिह २ बहुव्या
पकं च सामान्यं शास्त्रं अल्पव्यापको विशेषः अइए तव इदम् तवेदम् मम इदम् ४

ममेदम् हलादेरीषादौ टेर्लोपो वक्तव्यः हल ईषा हलीषा लांगल ईषा लांगली
षा मनस् ईषा मनीषा अद्य ओं अद्यों शक अंधु शकंधुः कर्क अंधु कर्कंधुः
सीमन् अंतः सीमंतः कुल अटा कुलटा पतत् अंजलिः पतंजलिः सार अंगः
सारंगः हलीषा लांगलीषा च मनीषादिं तथैव च शकंधुश्चैव कर्कंधुः सीमंतः
कुलटा तथा १ पतंजलिश्च सारंग एते प्रोक्ता हलादयः उ ओ अवर्ण उवर्णे परे सह
ओकारो भवति गंगा उदकं गंगोदकम् चंद्र उदयम् चंद्रोदयम् चरणोदकम् ऋ
अर् अवर्ण ऋवर्णे परे सह अर् भवति तव ऋद्धि तवर्द्धि मम ऋद्धि ममर्द्धि
क्वचिदार अवर्ण ऋवर्णे परे सः क्वचिदार भवति ऋणार्णम् दश ऋणं दशार्णम्
शीत ऋतः शीतार्त्तः दुख ऋणं दुखार्णम् प्र ऋणम् प्रार्णम् कमल ऋणम् क
मलार्णम् तृतीयासमासे वा दुखेन ऋतः दुखार्त्तः लृलम् अवर्णे लृवर्णे परे

।र०
।

सः अल् भवति तवल्कारः ऋऌयोः सावर्ण्यं वक्तव्यं परि अंकः पर्य्यंकः पल्यंकः
ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम् होतृ ऌकारः होतॄकारः ऋऌयोर्डलयोश्चैव
शषयोर्वबयोस्तथा वदंतेच सावर्ण्यमलंकारविदोजनाः एऐ ऐ अवर्णे एका
रे चैकारे परे सः ऐकारो भवति तव एषा तवैषा तव ऐश्वर्यं तवैश्वर्यम् ओ
औ औ अवर्णे ओकारे औकारे च परे सह औकारो भवति तव ओदनं तवौ
दनं तव औनिसं तवौनिसम् प्रादिरुपसर्गाः इत्युपसर्गसंज्ञायां उपसर्गस्या
वर्णस्य लोपो धातौ परयोः प्र एजते प्रेजते प्र एलयति प्रेलयति प्र ओषति
प्रोषति ओष्ठौत्वोर्वा अवर्णस्य ओष्ठौत्वोः परयोर्वा सह औकारो भवति समा
से इति किं विवोष्ठ विवोष्ठः स्थूल ओतुः स्थूलोतुः समास इति किं तवोष्ठः
इति स्वरसंधिः अथ प्रकृतिभाव उच्यते नामी अदसोमी शब्दः संधिर्न प्राप्नो ५

ति अमी आदित्या अमी अश्वा अमी आगता अमी उष्ट्रा अमि एउकादत्रा
इति किं अमो रोगोः अस्मात्लिति अपि अप्यश्व अमि अश्व तव अमी तवामी
ध्वे द्वित्वे इ च उ च ए च ध्वे इकारांतः उकारांतः एकारांतश्च शब्दो द्वित्वे वर्तमा
नः संधिर्न प्राप्नोति मणिवादिवर्ज्जं मणिवादौ तु संधिर्भवति अग्नी अत्र पटु
अत्र माले आनय मणिवादिवर्ज्जेणादिति किं मणि इव मणीव रोदसि इव
रोदसीव जंपती इव जंपतीव दंपती इव दंपतीव जामासे जायाशब्दस्य जा
देशः जायतीव ओ निपातः आकार ओकार निपात एकस्वरश्च संधिर्न प्रा
प्नोति आ एवं नु मन्यसे एवं किल उ नत् नो अत्र स्यात् नव्यम् इ इ इपश्य उ उति
ष्ठ प्लुतः प्लुतश्च संधिर्न प्राप्नोति देवदत्त एहि ३ आगदत्ता आगच्छ इह दुराद्धा
काने टेः प्लुतः दुराद्धाकाने गाने रोदने विचारणे गम्यमाने टेः प्लुतो भवति प्रकृत्या

न तिष्ठति रामः रामे इति रामेति विष्ण्वि विष्ण्व आगच्छः ॥ इति प्रकृतिभावः ॥ अथ व्यं-
जनकार्यमुच्यते ॥ चपा अबे जबाः ॥ पदांते वर्त्तमानस्य चपा जबा भवंति अबे परे
षट् अत्र षडत्र वाक् यथा वाग्यथा ॥ अचि अंतः ॥ अचेतः ककुप् इह ककु-
बेह तत् इदं तदिदम् ॥ आप् अंतः आबंतः ॥ ङमे ङमा वा ॥ पदांते वर्त्तमाना-
श्चपा ङमे परे ङमा वा भवंति वाक् मात्रम् वाग्मात्रम् वाङ्मात्रम् षट् मम षण्म-
म षड्मम एतत् मुरारिः एतन्मुरारिः मयटि नित्यम् मयटि प्रत्यये परे चपानां
ङमा नित्यं स्युः तत् मयं तन्मयीम् चित् मयं चिन्मयं जगत् मयम् जगन्म-
यं ॥ चपाच्छः शः ॥ चपात् उत्तरस्य शकारस्य छो वा भवति वाक् शूरः वाक् छूरः
वाक् शूरः ॥ हो र्भाः ॥ चपात् उत्तरस्य हकारस्य र्भा वा भवंति ननु एक हकारस्य
पंचवर्गभा घा ढा केन क्रमेण भवंति हकारस्य वर्गभावाद्वर्गचतुर्थो हस्य सव ६

र्णः यद्वर्गगस्य चपस्य तद्वर्गस्य चतुर्थो भवति तत् हविः तद्धविः वाक् हरिः वाग्घरिः
अप् आरः अब्भारः ॥ अकारः षट् हलानि षड्ढलानि षडुलानि ॥ स्तोः श्चुभिः
श्चुः ॥ स्तोः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ भवतः यथा-
संख्येन भवतः सकारस्य शकारः तवर्गस्य चवर्गः कस् छादयति कश्छाद-
यति कस् चरति कश्चरति कस् शूरः कश्शूरः तत् चित्रम् तच्चित्रम्
तत् श्रवणम् तच्छ्रवणम् तत् शास्त्रं तच्छास्त्रम् ॥ शात् ॥ शकारादुत्त-
रस्य तवर्गस्य चत्वं न भवति विश्नः विश्नः प्रश्नः प्रश्नः ॥ ष्टुभिः ष्टुः ॥ स्तोः
सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ यथासंख्येन भवतः
सकारस्य षकारः तवर्गस्य टवर्गः कस् षष्ठः कष्षष्ठः कस् टीकते कष्टी-
कते तत् टीका तट्टीका तत् टीकते तट्टीकते ॥ तोर्लिः ॥ तवर्गस्य लका-

१० रेपरे लकारो भवति । नल्लुनाति । नँल्लुनाति । भवाल्लिखति । भवांल्लिखति
भवाल्लुनाति । भवल्लुनाति । अनंतस्याद्विप्रभेदा रेफवर्जिता यवला सा
नुनासिका निरनुनासिकाश्च तत्र सानुनासिक एव नकारस्य लकारः । नषि
षि नाम षकारे परे तवर्गस्य टुत्वं न भवति । भवान्षष्ठः । भवान्षट् । तोरंत्या
त् । पदांते वर्तमानात् टवर्गात्परस्य स्तोः टुत्वं न भवति । षट्नरः । जभे जमा
वा । षण्नरः । वपावेजवा । षड्नरः । षट्सिदंति । षट्सीदंति । नसकृछते
। नो तस्य पदस्य छते परे सगागमो भवति । टित्कितावोदंतयोर्धक्षो राज
न्च्छित्रम् । राजंश्छित्रम् । टित्वादादौ कित्वादंते । स्तोः श्चुभिः श्चुः । नश्चापदां
ते झसे । भवान्तनोति । भवांस्तनोति । भवान्छादयति । भवांश्छादयति
शे च छ्का । नो तस्य पदस्य शे परे वा चगागमो भवति । भवान्शूरः । भवाञ्च्छूरः ७

भवाञ्छूरः । भवाञ्शूरः । ङणनो ह्रस्वाद्विः स्वरे । ङकारणकारनकारा ह्रस्वा
दुत्तरा द्विर्भवंति स्वरे परे । प्रसङ्ङिदं । प्रसङिदम् । सुगण्णिह । सुगणिह । राजन्नि
ह । राजनिह । छः । ह्रस्वादुत्तराच्छकारो द्विर्भवति । खसे चपा झसानां खसे परे च
पा भवंति । तवच्छत्रं । तवछत्रम् । क्वचिद्दीर्घादपि वक्तव्यः । ह्रीच्छः । ह्रीछः । म्ले
च्छः । म्लेछः । मोनुस्वारः । मकारस्य मोनुस्वारो भवति हसे परे पदांते च । नम्
हसति । नंहसति । पटुम्वृष्या । पटुंवृष्या । नश्चापदांते झसे । नकारस्य मकारस्य
चापदांते वर्त्तमानस्यानुस्वारो भवति झसे परे । यशान्सि । यशांसि । पयान्सि । पयां सि
सि । स्वनघानहि । स्वनघांहि । कम्सः । कंसः । पुम्भ्यां । पुंभ्यां । स्वरे मः । अनुस्वार
स्य मकारो भवति स्वरे परे । अहंमस्मि । अहमस्मि । त्वमसि । त्वंअसि । अस्ति
रामस्ति । यमा यपे स्य वा । अनुस्वारस्य यमा वा भवंति यपे परे । असय्यस्य सव

णी॥ अंगंनः॥ अङ्गनः॥ अंकितः॥ अङ्कितः॥ अंचितः॥ कुंठितः॥ कुण्ठितः॥ वा पदांते वर्त्त
मानस्यनुस्वारस्ययमोवा भवति यपे परे॥ त्वंकरोषि॥ त्वङ्करोषि॥ त्वंकरोषि॥ तंत
नोति॥ तन्तनोति॥ संयंता॥ सय्यंता॥ संवत्सरेण॥ सव्वत्सरेण॥ यंलोकं॥ यल्लोकं॥
वर्गभावे परः रूपं स्यात्॥ संवेता॥ सघेता॥ त्वंछदसि॥ छंदस्यानुस्वारः॥ ह्रंकारमा
पद्यते॥ अघोषस्वरेफेषुपरतः॥ हंसः॥ हल्लंसः॥ त्वंसोमः॥ त्वयङ्सोमः॥ वयंशोमः॥
वयङ्शोमः॥ सँहितंरवि॥ नेउ॥ रवि॥ इति व्यंजनसंधिः॥ अथ विसर्गसंधि
र्गद्यते॥ विसर्जनियस्य सः॥ विसर्जनीयस्य सकारो भवति खसे परे॥ कः चु
रति॥ कश्चरति॥ कः छादयति॥ कश्छादयति॥ कः तनोति॥ कस्तनोति॥ अघोषसे
वा विसर्जनीयस्य वा सरो भवति॥ कः शेते॥ कश्शेते॥ कः षंठः॥ कष्षंठः॥ कः षठः
कः साधुः॥ कस्साधुः॥ कः साधुः॥ कुप्वौ ᳵकᳵपौ वा॥ विसर्जनीयस्य कवर्गपवर्गस

वंधिनखसेपरे ᳵकᳵपौ वा भवतः॥ कपाउच्चार्णीयौ॥ कः करोति॥ कᳵकरोति॥ कः ख
नति॥ कᳵखनति॥ कः पठति॥ कᳵपठति॥ कः फलति॥ कᳵफलति॥ नहरस्तो करप
स्ययोश्चार देवस्पयो॥ मुहूगम नलेपश्च नत्करः॥ तस्करः॥ भात्करः॥ भास्करः॥
भाः करः॥ भास्करः॥ वृहत्पति॥ वृहस्पति॥ हरिः॥ चंद्रः॥ हरिश्चंद्रः॥ वाचस्पसाद
यः॥ संज्ञा शब्दा निपातनात् साधवः॥ काः करः॥ कास्करः॥ पाः करः॥ पास्करः॥
यल्लक्षणेनानुपपन्नं तत्सर्वं निपातात्सिद्धम्॥ अन्होरो रात्रिषु॥ अन्हो विसर्ज
नीयस्य पदांते रो भवति॥ रा आदिगणवर्जितेषु परतः॥ अहः पति॥ अहर्पति॥
अहः गणः॥ अहर्गणः॥ अरात्रिषु इति विशेषणात्॥ हवे॥ अकारात्परस्य विस
र्जनीयस्य उकारो भवति उत्वो॥ अहोरात्रं॥ अहोरूपम्॥ अहोरथ्यांतरम्॥ अतोत्सुः॥
अकारात्परस्य विसर्जनीय उकारो भवति अतिपरतः॥ कः अर्थः॥ कोर्थः॥ हवे

।२० कः गतः कोगतः देवः याति देवोयाति मनः रथः मनोरथः आवे लोपश्च अवर्णा
त्परस्य विसर्जनीयस्य लोपो भवति आवे परे देवाः अत्र देवा अत्र वाताः वाति वाता
वाति आयाः तु देवः आयातु देव स्वरे यत्वं वा अवर्णात्परस्य विसर्जनीयस्य स्वरे
यत्वं वा भवति कः इह कयिह कः इह देवाः अत्र देवायत्र देवा अत्र भोस् भो
स् भगोस् अघोस् इत्येतस्मात्परस्य विसर्जनीयस्य लोपश्च भवत्यवे परे ४ भोः
एहि भो एहि भगोः नमस्ते भगो नमस्ते अघोः पाहि अघो पाहि नामिनो रः
नामिनः परस्य विसर्जनीयस्य रेफो भवत्यवे परे अग्निः अत्र अग्निरत्र पटुः
यजते पटुर्यजते रेफप्रकृतिः खपे वा रेफप्रकृतिकस्य विसर्जनीयस्य
रेफो वा भवति खपे परे गीः पतिः गीर्पतिः कुष्वाकघौ वा गीष्पतिः धुः पति
धुर्पति धुष्पतिः रः रेफसंबंधिनो विसर्जनीयस्य रेफो भवत्यवे परे प्रातः ९

अत्र प्रातरत्र अंतः गतः अंतर्गतः रिपो लोदीर्घश्च रेफस्य रेफे परे लोपो भ
वति पूर्वस्य च दीर्घः पुनः रमते पुना रमते शुक्ति रूपस्य नाभाति शुक्ती रूप
स्य नाभाति सैषाद्धसे सशब्दादेषशब्दाच्च परस्य विसर्जनीयस्य लोपो भवति
हसे परे सः चरति स चरति एषः हसति एष हसति सैषाद्दिति संहिता सै
ष दाशरथी रामः सैष राजा युधिष्ठिरः सैष कर्णो महात्यागी सैष भीमो महाबु
लः ॥ ए ॥ इस्मादौ पादपूर्णे संध्यर्थौ यदुक्तं लौकिका एक तद्देवकुल्वं भवेत् से
मां तु भ्यादद्दे सौषा मिसादिनामनुष्टना ॥१॥ सः इमां भूमिः आरदे सैषां
सेमां क्वचिन्नामिनः लोपश्च नामिनः परस्य विसर्जनीयस्य लोपश्च भवति अ
वे परे इयं अश्वे भुम्या हदे आहिर्लोपश्च क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्वि
भाषा क्वचिदन्यदेव विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति ॥

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ॥ धातोस्तदर्थातिशयेन यो
गस्तदुच्यते पंचविधं निरुक्तम् ॥१॥ वर्णागमो गवेंद्रादौ सिंहे वर्णविपर्ययः ॥ षो
डशादौ विकारः स्याद्वर्णनाशः पृषोदरे ॥२॥ वर्णविकारनाशाभ्यां धातोरतिशयेन यः
योगस्तदुच्यते प्राज्ञैर्मयूरभ्रमरादिषु ॥४॥ मह्यांऽतिशयेनः शेतीति मयूरः ॥ भ्र
मरं रौतीति भ्रमरः ॥४॥ इति विसर्गसंधिः ॥ प्रक्रियासमासम् ॥ देवायन मत्वाप्यम् ॥ अ
थ विभक्तिर्विभाव्यते ॥ सा द्विधा स्यादिस्त्यादिश्च ॥ विभक्त्यंतं पदम् ॥ तत्र स्यादिर्विभ
क्तिर्नाम्नो योज्यते ॥ अविभक्ति नाम ॥ विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दरूपं ना
मोच्यते ॥ कृत्तद्धितसमासाश्च प्रातिपदिकसंज्ञा इति केचित् ॥ तस्मात् ॥ सि औ जस्
अम् औ शस् ॥ टा भ्यां भिस् ॥ ङे भ्यां भ्यस् ॥ ङसि भ्यां भ्यस् ॥ ङस् ओस् आम् ॥ ङि ओ
स् सुप् ॥ तस्मान्नाम्नः परास्यादयः सप्त विभक्तयो भवंति ॥ तत्राप्यर्थमात्रेकत्ववि १०

वक्षायां प्रथमैकवचने देव सि इति स्थिते ॥ इकार उच्चारणार्थः ॥ सोर्विसर्गः ॥ स
काररेफयोर्विसर्जनीयादेशो भवत्यधातोः रसेपदांते च ॥ देवः ॥ द्वित्वविवक्षायां
[illegible] देव औ इति स्थिते ॥ औ औ औ ॥ देवौ ॥ बहुत्वविवक्षायां बहुवचने जस्
इति स्थिते ॥ जकारस्येत्संज्ञायां लोपः प्रयोजनं जसीति विशेषणार्थः ॥ दीर्घवि
सर्गौ देवाः ॥ अकाराज्जसोऽसुक् क्वचित् वक्तव्यः ॥ देवासः ब्राह्मणासः ॥ द्विती
येकवचने देव अम् इति स्थिते ॥ अमशसोरस्य ॥ समानादुत्तरयोरमशसो
रकारस्य लोपो भवति ॥ देवम् देवौ ॥ बहुवचने देव शस् इति स्थिते ॥ शका
रश्शीति विशेषणार्थः ॥ सो नः पुंसः ॥ पुंलिंगात् समानादुत्तरस्य शसः सका
रस्य नकारादेशो भवति ॥ शसीति शसि परे पूर्वस्य दीर्घो भवति ॥ यदादेशास्त
द्वद्भवति न तु वर्णमात्रविधौ ॥ देवान् ॥ तृतीयैकवचने देव टा इति स्थिते ॥ ट

ङसिरत् ॥ अकारात्परो ङसि रद्भवति ॥ देवात् ॥ देवाभ्यां ॥ देवेभ्यः ॥ षष्ठ्येकवचने देवङस् इति
१० कारोनुबंधष्टेनेति विशेषणार्थः ॥ टेन ॥ अकारात्परष्टा इनो भवति ॥ अइए ॥ देवे
न ॥ अझि ॥ अकारस्य आत्वं भवति भकारे परे ॥ देवाभ्यां ॥ भ्यः ॥ अकारात्परस्य भि
सो भकारस्याकारादेशो भवति ॥ अइए ॥ ऐऐ ॥ देवैः ॥ अकारस्य भिसि छंदस्ये
कारो वा वक्तव्यः ॥ देवेभिः ॥ यथा भद्रं कर्णेभिः ॥ चतुर्थ्येकवचने देवङे इति स्थि
ते ङकारो ङित्कार्यार्थः ॥ सर्वत्र ङे रक् ॥ अकारात्परस्य चतुर्थ्येकवचने
देवङे इति स्थिते ङेः तस्यागागमो भवति ॥ टित्वादादौ कित्वादंते ॥ ए अय दीर्घ
देवाय ॥ देवाभ्यां ॥ एस्भि बहुत्वे ॥ अकारस्य एत्वं भवति सकारे भकारे च परे ब
हुत्वे सति ॥ देवेभ्यः ॥ पंचम्येकवचने देवङसि इति स्थिते ॥ ङस्य ॥ अकारा
त्परस्य ङसः स्यो भवति ॥ देवस्य ॥ ओसि ॥ ओसि परे अकारस्य एत्वं भवति ॥ देव
योः ॥ ए अय ॥ देव आम् इति स्थिते ॥ नुडामः ॥ समानादुत्तरनुडागमो भवति ॥ टि ११

त्वादादौ कित्वादंते उकार उच्चारणार्थः ॥ नामि ॥ नामि परे पूर्वस्य दीर्घो भवति
देवानां ॥ सप्तम्येकवचने देवङि इति स्थिते ङकारो ङित्कार्यार्थः ॥ अइए ॥ दे
वे ॥ देवयोः ॥ देवसुप् इति स्थिते पकारो पित्कार्यार्थः ॥ क्विलात्षः सः ॥ कृतस्य
कवर्गादिलात्प्रत्याहारादुत्तरस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारा
देशो भवति ॥ देवेषु ॥ आमंत्रणे सिर्धिः ॥ आमंत्रणमभिमुखीकरणं तस्मि
न्नर्थे विहितः सिर्धिसंज्ञको भवति ॥ समानाद्धेर्लोपो धातोः ॥ समानादुत्तर
स्य धेर्लोपो भवत्यधातोः ॥ अभिमुखाभिव्यक्तये हेशब्दस्य प्राक्प्रयोगः
हे देव ॥ हे देवौ ॥ तस्य संबोधनं हे देवाः ॥ एवं घटपटस्तंभकुंभरामकृष्णाद
यः अकांतो पुल्लिंगाः ॥ तत्र अकारांतानामपि सर्वादिनां तु विशेषः ॥ सर्व
विश्व उभ उभय अन्य अन्यतर इतर उत्तर उत्तम कतर कतम सम सिम

नेम। एक। सर्व। पर। अवर। दक्षिण। उत्तर। अपर। अधर। स्व। अंतर। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। द्वि। किम्। युष्मद्। अस्मद्। भवत्। एते सर्वादयस्त्रिलिंगाः। अत्र पुल्लिंगत्वेन रूपं नेयम्। सर्वः। सर्वौ। जसी। जसि सर्वादेरकारांतात्परस्य जस इ भवति। गुरुसी च सर्वस्य वक्तव्यः। अइए सर्वे। सर्वं। सर्वौ। सर्वान्। षृन्नो णो नं ने। षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति। अंते स्थितस्य न भवति। सर्वान्। इत्यादौ ज्ञापकात्। अवकुप्वंतरेपि। अवनुस्वारेण कवर्गेण पवर्गेण च पुनः मध्ये व्यवधानेपि भवति। नान्येन। सर्वेण। सर्वाभ्यां। सर्वैः। चतुर्थ्येकवचने सर्व ङे इति स्थिते। सर्वादेः स्मट्। सर्वादेरकारांतात्परस्य चतुर्थ्येकवचनस्य ङे इत्येतस्य स्मडागमो भवति। एऐऐ सर्वस्मै। सर्वाय। सर्वाभ्यां। सर्वेभ्यः। अतः। सर्वादेरकारांतात्परस्यातः सुडा १२

उगमो भवति। सर्वस्मात्। सर्वात्। सर्वाभ्यां। सर्वेभ्यः। सर्वस्य। सर्वयोः। सुडामः। सर्वादेरकारांतात्परस्य आमः सुडागमो भवति। सर्वेषां। ङि स्मिन्। सर्वादेरकारांतात्परस्य ङि स्मिन् भवति। सर्वस्मिन्। सर्वयोः। सर्वेषु। हे सर्व। हे सर्वौ। हे सर्वे। एवं विश्वादीनामेकशब्दपर्यंतानां रूपं ज्ञेयम्। डतरडतमौ विहायतौ अस्पयो। नदस्तदंतात्र शब्दा आद्या। पूर्वः। पूर्वौ। पूर्वादीनां नवानां जस इकारो वा वक्तव्यः। पूर्वे। पूर्वाः। पूर्वं। पूर्वौ। पूर्वान्। पूर्वेण। पूर्वाभ्यां। पूर्वैः। पूर्वस्मै। पूर्वाभ्यां। पूर्वेभ्यः। पूर्वस्मात्। पूर्वात्। पूर्वाभ्यां। पूर्वेभ्यः। पूर्वस्य। पूर्वयोः। पूर्वेषां। पूर्वस्मिन्। पूर्वे। पूर्वयोः। पूर्वेषु। हे पूर्व। हे पूर्वौ। हे पूर्वाः। परः। परौ। परे। पराः। अवरः। अवरौ। अवराः। इत्यादि। ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ। प्रथम चरम तय अल्प अर्द्ध कतिपय नेमानां जसी वा। प्रथमः। प्रथमौ। प्रथमे। प्रथमाः। चरमः। चरमौ

पूर्वं

।२० चरमे चरमाः नेमः नेमौ नेमे नेमाः शेषं देववत् तयाडोपसयो तदं नाश्रा
२ द्वौ श्राद्या द्वितीयस्य सर्ववद्रूपं ङि· त्सुवा वक्तव्यम् द्वितीयः द्वितीयौ द्वितीयाः
द्वितीये द्वितीयं द्वितीयौ द्वितीयान् द्वितीयेन द्वितीयाभ्यां द्वितीयैः द्वितीय
स्मै द्वीतीयाय द्वितीयाभ्यां द्वितीयस्मात् द्वितीयात् द्वितीयाभ्यां द्वितीयेभ्यः
इत्यादि हे द्वितीय हे द्वितीयौ हे द्वितीयाः एवं तृतीयशब्दः तृतीयः तृती
यौ तृतीयाः तृतीयस्मै तृतीयस्मात् इत्यादि उभशब्दो नित्यं द्विवचनां
तः उभौ उभौ उभाभ्यां उभाभ्यां उभाभ्यां उभयोः उभयोः हे उभौ उभय
शब्दस्य द्विवचनाभावः एकवचने बहुवचने भवतः उभयः उभये उभ
यम् उभयान् उभयेन उभयैः उभयस्मै उभयेभ्यः उभयस्मात् उभये
भ्यः उभयस्य उभयेषां उभयस्मिन् उभयेषु हे उभय हे उभये अकारां १३

तपुंल्लिंगे मासशब्दः मासस्य लोपो वा मासशब्दस्य अकारस्य लोपो वा भव
ति सर्वासु विभक्तिषु परतः हसे पसे लोपः हसां तादीवंता अपरस्य से लोपो
भवति माः मासः मासौ मासौ मासः मासाः मासं मासं मासौ मासौ
मासः मासान् मासा मासेन माभ्यां स्त्रोर्विसर्गः अदिवे लोपश्च मासैः
माभिः मासाय मासे माभ्यां मासाभ्यां माभ्यः मासेभ्यः मासः मासात्
माभ्यां मासाभ्यां माभ्यः मासेभ्यः मासः मासस्य मासोः मासयोः मासां
मासानां मासि मासे मासोः मासयोः मासु मासेषु हे मास हे माः हे मा
सौ हे मासः हे मासाः आकारांतः पुंल्लिंगे सोमपाशब्दः सोमपाः सोम
पौ सोमपाः सोमपां सोमपौ सोमपाः शस् इति स्थिते आतो धातोर्लोप
श्च धातुसंबंधिनः आकारस्य लोपो भवति असादौ स्वरे परे सोमपः सो

मपा सोमपाभ्यां सोमाभिः सोमपे सोमपाभ्यां सोमपाभ्यः सोमपः सोमपाभ्यां सो
मपाभ्यः सोमपः सोमपोः सोमपां सोमपि सोमपोः सोमपासु हे सोमपाः स
माना धेर्लोपो धातोः समानादुत्तरस्य धेर्लोपो भवत्यधातोः अधातो इति विशेष
णेन धेर्लोपो नास्ति हे सोमपाः एवं कीलालपा विश्वपा शंखध्माप्रभृतयः आ
कारांतो पुल्लिंगो हाहाशब्दः हाहा हाहौ हाहाः हाहां हाहौ हाहान् इत्यादि इका
रांतः पुल्लिंगो हरिशब्दः हरिः ओ यः इकारांतादुकारांताच्च परस्य ओ य आपद्य
ते ऽत्तु भवतः दीर्घे हरी ए ऊ जसि इकारांतस्य उकारांतस्य च जसि परे एका
र ओकारश्च भवति ए अय हरयः हरिं हरी हरीन् टा ना स्त्रियां इकारांतादुका
रांताच्च परष्टा ना भवति हरिणा हरिभ्यां हरिभिः ङिति इकारांतस्य उकारांत
स्य ङिति परे एकार ओकारश्च भवति हरये हरिभ्यां हरिभ्यः हरेः ङसिङसोर १४

स्य एदोद्भ्यामुत्तरस्य ङसिङसोरकारस्य लोपो भवति हरेः हर्योः हरीणां ङेरौ ङित्
एदोद्भ्यामुत्तरस्य ङेरौ भवति स च ङित् ङितीटि ङिति परे टेर्लोपो भवति हरौ
हर्योः हरिषु धो इकारांतस्य उकारांतस्य च धिविषये एकार ओकारश्च भव
ति हे हरे हे हरी हे हरयः एवं मणि गिरि रवि कवि कलि प्रभृतयः उकारांतश्च
भानु विष्णु वायु गुरु शंभु प्रभृतयोऽप्येतैरेव सूत्रैः सिध्यंति भानुः भानू भानवः भा
नुं भानू भानून् भानुना भानुभ्यां भानुभिः भानवे भानुभ्यां भानुभ्यः भा
नोः भानुभ्यां भानुभ्यः भानोः भानवोः भानुनां भानौ भान्वोः भानुषु हे भा
नो हे भानू हे भानवः सखिशब्दस्य सेर्डा धेः सखिशब्दात्परस्य सेरधेर्डा भव
ति स च डित् डित्वाट्टेर्लोपो भवति सखा ऐ सख्युः सखिशब्दस्यैकारादे
शो भवति पंचसु परेषु गुरुत्वाच्च सर्वस्य कृत्स्नः षष्ठिनिर्दिष्टस्यादेशस्तदं

लसत्वेपन् सखायो आयादेशः द्विवचनस्य वा छंदसि सखाया सखायः सखायं
सखायौ सखायः सखीन् सखिपत्योरीङ् सखिपतिशब्दयोरिगागमो भवति ॥
टांङेङिषु परतः दीर्घत्वात् टा ना न भवति सख्या पत्या आगमजमनित्यं इति न्याया
त् सखिना पतिना सखिभ्यां सखिभिः सख्ये सखिभ्यां सखिभ्यः ङसिङसोः सखि
पतिशब्दयोरिगागमो भवति उः ङसिङसोः उः कारे परे सख्युः स इति स्थिते इनोऽङ
उः इकारांतात्परस्य ङसिङसोरकारस्य उकारो भवति स च ङित् ङिति परे टेर्लो
पो भवति सख्युः सखिभ्यां सखिभ्यः सख्युः सख्योः सखीनां सप्तम्येकवचने ङे
रौ ङित् द्वित्वौकारे कृते पश्चात् सखिपत्योरिगागमो भवति सख्यौ सख्योः स
खिषु हे सखे हे सखायौ हे सखायः अधि इति विशेषणादिकारो धि विषये धे
र्लोपो नास्ति पतिशब्दस्य प्रथमा द्वितीययोर् ईशब्दवत्प्रक्रिया पतिः पती पतयः २५

पतिं पती पतीन् पतिना तृतीयादौ सखिशब्दवत् वक्तव्यः पत्या पतिना पति
भ्यां पतिभिः पत्ये पतिभ्यां पतिभ्यः पत्युः पतिभ्यां पतिभ्यः पत्युः पत्योः पतीनां
पत्यौ पत्योः पतिषु हे पते हे पती हे पतयः पतिरसमास एव सखिशब्दवत्वक्त
व्यः ततः समासांतस्य नादयो भवंति प्रजापतिना प्रजापतये इत्यादि द्विशब्दो
नित्यं द्विवचनांतः त्यदादेष्टेरः स्यादौ त्यदादेष्टेरकारो भवति स्यादौ परे द्वौ द्वौ
द्वाभ्यां द्वाभ्यां द्वाभ्यां द्वयोः द्वयोः हे द्वौ त्रिशब्दो नित्यं बहुवचनांतः त्रि जस् इति
स्थिते ए ओ जसि ए अय त्रयः त्रीन् त्रिभिः त्रिभ्यः इ एकस्योक्तौ यक लक्षणं
२. सकृत एव प्रवर्तते त्रिशब्दस्य त्रयादेशो भवति नामि परे ङिदेनस्य वक्तव्यः
त्रयाणां त्रिषु हे त्रयः कतिशब्दो नित्यं बहुवचनांतः कतिशब्दाज[illegible]सो लुक् रा
कतिशब्दात्परयोर्जस्शसोर्लुग्वक्तव्यः कति कति कतिभिः कतिभ्यः कति

भ्यः कतीनां कतिषु हे कति इकारांतो पुल्लिंगो सुश्रीशब्दः य्वौ धातोरियुवौ स्वरे
धातोरीकारोकारयोरियुवौ भवतः स्वरे परे सुश्रीः सुश्रियौ सुश्रियः सुश्रियं
सुश्रियौ सुश्रियः सुश्रिया सुश्रीभ्यां सुश्रीभिः सुश्रिये सुश्रीभ्यां सुश्रीभ्यः सु
श्रियः सुश्रीभ्यां सुश्रीभ्यः सुश्रियः सुश्रियोः सुश्रीयां सुश्रियि सुश्रियोः
सुश्रिषु हे सुश्रीः हे सुश्रियौ हे सुश्रियः एवं सुधीःशब्दः सुधीः सुधियौ सुधि
यः उकारांतः पुल्लिंगो स्वयंभूशब्दः स्वयंभूः य्वौ धातोरियुवौ स्वरे स्वयंभु
वौ स्वयंभुवः स्वयंभुवं स्वयंभुवौ स्वयंभुवः स्वयंभुवा स्वयंभुवे इत्यादि से
नानीशब्दस्य हसादौ स्वरादौ तु विशेषः सेनानीः य्वौ वा धातोरवयवसंयोगः
पूर्वो यस्मादीकारादूकाराद्वा नास्ति तदंतस्यानेकस्वरस्येकारस्योकारस्य च यवा
रवकारो भवतः स्वरे परे वर्षाभ्वपुनर्भूश्च निरिक्तो भूशब्द सुधीशब्दौ वर्जयि

त्वा वायहल्लादियं विवक्षा सेनान्यौ सेनान्यः सेनान्यं सेनान्यौ सेनान्यः सेनान्या
सेनानीभ्यां सेनानीभिः सेनान्ये सेनानीभ्यां सेनानीभ्यः सेनान्यादीनां वाम्यो
नुट् नक्तव्यः सेनान्यां सेनानीनां आमङेः नीयश्च आवंतादीवं ताद्धनीशब्दा
च्चोत्तरस्य ङेः रामादेशो भवति सेनान्यां सेनान्योः सेनानीषु हे सेनानीः एवं
ग्रामणीप्रभृतयः ग्रामणीः ग्रामण्यौ ग्रामण्यः उकारांतः पुल्लिंगो यवलूशब्दः
यवलूः यवल्वौ यवल्वः इत्यादि वातप्रमीशब्दस्य भेदः वातप्रमीः वातप्रम्यौ
वातप्रम्यः वातप्रमीं अमी वातप्रमीमाङ्शसि वातप्रमीनिति शेषं तु वातप्र
मीशेषं ग्रामणीसदृशं विदुः ऋकारांतः पुल्लिंगो पितृशब्दः सेरा ऋकारांता
त्परस्य सेरा भवति स च ङित् ङिति टेः ङिति परे टेर्लोपो भवति पिता अर् पंच
सु ऋकारस्यार् भवति पंचसु परेषु पितरौ पितरः पितरं पितरौ पितॄन् धे

१० रर् ऋकारांतात्परस्य धेरर् भवति । सबुडित् । डितिटेः । हे पित । हे पितरौ । हे पितरः । पित्रा पितृ
भ्यां पितृभिः । पित्रे पितृभ्यां पितृभ्यः । पितुः । ऋतोरुः । पितृभ्यां पितृभ्यः । पितुः । पित्रोः
पितॄणां । डौ ऋकारस्य अर् भवति डौ परे । पितरि । पित्रोः । पितृषु । एवं नृशब्दः । ना नरौ
नरः । नरं नरौ नरान् । नुर्वा नामि दीर्घः । नृशब्दस्य नामि परे दीर्घो वा भवति । नृणां नॄ
णां । नरि नरोः नृषु । कर्तृशब्दस्य पंचसु विशेषः । स्तुरारः सकारतृप्रत्ययसंबंधिन
ऋकारस्यार् भवति पंचसु परेषु यदादेशस्तद्भवति । सेरा । टित्वाट्टिलोपः
कर्ता । कर्तारौ । कर्तारः । कर्तारं कर्तारौ कर्तॄन् । कर्त्रा कर्तृभ्यां कर्तृभिः । कर्त्रे
कर्तृभ्यां कर्तृभ्यः । ऋतोरुः । कर्तुः । कर्तृभ्यां कर्तृभ्यः । कर्तुः । कर्त्रोः । नुर्वा ना
मि दीर्घः । कर्तॄणां । कर्तरि । कर्त्रोः । कर्तृषु । एवं होतृपोतृप्रसास्तृनप्तृप्रभृतयः
स्वसा नप्ता च नेष्टा च त्वष्टा क्षत्ता तथैव च । होता पोता प्रसस्ता च अष्टौ स्वस्रादय १७

स्मृता । उकारांतस्य क्रोष्टुशब्दस्य पंचसु विशेषः । उकारांतस्यापि क्रोष्टुशब्दस्य पंच
स्वपि तृप्रत्ययांतस्येव रूपं वक्तव्यम् । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारं क्रोष्टारौ
क्रोष्टु शस् इति स्थिते । शसि तृप्रत्ययांतता स्याद्वा वक्तव्यः । क्रोष्टून् । तृतीयादौ स्वरा
दौ तृप्रत्ययांता वा वक्तव्यः । क्रोष्ट्रा । क्रोष्टुना । क्रोष्टुभ्यां । क्रोष्टुभिः । क्रोष्ट्रे । क्रोष्टवे । क्रोष्टु
भ्यां । क्रोष्टुभ्यः । क्रोष्टुः । क्रोष्टोः । क्रोष्टुभ्यां । क्रोष्टुभ्यः । क्रोष्टोः । क्रोष्टुः । क्रोष्ट्रोः । क्रोष्ट्वोः
क्रोष्टु आम् इति स्थिते । कृताकृतप्रसंगी यो विधिः स नित्यः नित्ययोर्मध्ये नित्यवि
धिर्बलवान् । नुडागमे कृते सति ह्रस्वादित्वात् तृज्वद्भावो नास्ति । क्रोष्टूनां । ङौ । क्रोष्ट
रि क्रोष्टौ । क्रोष्ट्रोः । क्रोष्ट्रोः । क्रोष्टुषु । हे क्रोष्टो । ऋकारांता ॠकारांता एकारांता
श्चाप्रसिद्धाः । ऐकारांतः पुल्लिंगो रैशब्दः । रैशब्दस्याकारादेशो भवति सकार रैर्वि:
त्रि भकारादौ विभक्तौ परतः । स्वरादौ आयादेशः । राः । रायौ । रायः । रायम् रो

कारांतः पुल्लिंगो गोशब्दः । ओरौ । ओकारस्यौकारादेशो भवति पंचसु परेषु पुरतः । गौः ।
गावौ । गावः । गां । गावौ । गाः । गवा । गोभ्यां । गोभिः । गवे । गोभ्यां । गोभ्यः । ङसिङसोऽङेः । रस्येस
कारस्य लोपः । गोः । गोः । गोभ्यां । गोभ्यः । गोः । गवोः । ओतो गो रामः । ओतौ गोशब्दात्परस्यामो
नुडागमो भवति । गवां । गो नुट् वा छंदसि । गोनां । गवि । गवोः । गोषु । एवं सुद्योश
ब्दः । सुधौ । सुधावौ । सुधावः । हे सुधो । औकारांतः पुल्लिंगो ग्लौशब्दः । तस्य ग्लौश
ब्दस्य हसादौ विशेषः । स्वरादौ तु सर्वत्रावादेशः । ग्लौः । ग्लावौ । ग्लावः । ग्लावं । ग्लावौ ।
ग्लावः । इत्यादि । इति स्वरांताः पुल्लिंगाः । अथ स्वरांता स्त्रीलिंगाः प्रदर्श्यंते । तत्राका
रांतो गंगाशब्दः । आपः । आबंतात्परस्य सेर्लोपो भवति । गंगा । औरी । आबंतात्प
रस्य औ इकारमापद्यते । अइए । गंगे । गंगाः । धिरि । आबंतात्परस्य धिरि भवति । हे
गंगे । हे गंगे । हे गंगाः । अंबादीनां धौ ह्रस्वः । अंबादीनां धौ परे ह्रस्वो भवति । हे अंब । १८

हे अक्क । हे अल्ल । हे अत्त । शेषं गंगाशब्दवत् । गंगां । गंगे । गंगाः । टोस्वरे । आबंतस्य प
रस्य टौसोः परयोरेत्वं भवति । ए अय । गंगया । गंगाभ्यां । गंगाभिः । ङितां यट् । आबंता
त्परस्य ङितां वचनानां यडागमो भवति । गंगायै । गंगाभ्यां । गंगाभ्यः । गंगायाः । गंगा
भ्यां । गंगाभ्यः । गंगायाः । गंगयोः । गंगानां । आमङेः । आबंतादिबंतान्नीशब्दाच्च
तस्य ङेः आमादेशो भवति । गंगायां । गंगयोः । गंगासु । एवं श्रद्धा मेधा शाला माला
हेला दोला वेला माया मायादयः । प्रभृतयः । सर्वादीनां तु ङित्सु विशेषः । सर्वा । स
र्वे । सर्वाः । सर्वां । सर्वे । सर्वाः । सर्वया । यटोच्च । आबंतात्सर्वादेः परस्य यट् सुडागमो
भवति । ह्रस्वस्य चापो ह्रस्वो भवति । सर्वस्यै । सर्वस्याः । सर्वाभ्यां । सर्वाभ्यः । सर्व
स्याः । सर्वयोः । सर्वासां । सर्वस्यां । सर्वयोः । सर्वासु । आकारांतः स्त्रीलिंगो जराशब्दः ।
जरायाः स्वरादौ जस् वा वक्तव्यः । जरा । जरसौ । जरे । जरसः । जराः । हे जरे । हे जरसौ

हे जरे जरसं हे जरा: । जरसं जरां जरसौ जरे जरस: जरा: । जरसा । जरया जराभ्यां ज
राभि: । जरसे जरायै जराभ्यां जराभ्य: । जरस: । जराया: । जराभ्यां जराभ्य: । जरस: ज
राया: । जरसो: । जरयो: । जराणां जरसां जरसि जरयो: जरसो: । जरासु । इकारांतो
बुद्धिशब्द: । बुद्धिशब्दस्य प्रथमा द्वितीययो: हरिशब्दवत्प्रक्रिया । बुद्धि: बुद्धी
बुधय: । बुद्धिं बुद्धी बुद्धी: पुंस इति विशेषणान्नत्वं न । बुद्ध्या । इदुद्भ्यां स्त्रियां व
र्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वा आडागमो भवति । बुद्ध्यै
बुद्धये बुद्धिभ्यां बुद्धिभ्य: । बुद्ध्या: । बुद्धे: । बुद्धिभ्यां बुद्धिभ्य: । बुद्धे: । बुद्ध्या: । बुद्ध्यो:
बुद्धीनां । स्त्रियां योयो: ह्रस्वश्च । तस्माद्वा । इवर्णांतादुवर्णांतात् स्त्रियां वर्तमा
नात्परस्य ङि आमादेशो भवति । बुद्ध्यां आडागमाभावे आमोप्यभाव: । बुद्धौ बुद्ध्यो:
बुद्धिषु । एवं मति गिरि पंक्ति धृति रुचि प्रभृतय: । एवं धेनु रज्जु तनु प्रभृतय: । अथ १९

न

कारांता स्त्रीलिंगा । एतैरेव सूत्रै: सिध्यंति । धेनु: धेनू धेनव: । धेनुं धेनू धेनू: ।
धेन्वा धेनुभ्यां धेनुभि: । धेनवे धेन्वै धेनुभ्यां धेनुभ्य: । धेनो: । धेन्वा: । धेनुभ्यां धे
नुभ्य: । धेन्वा: । धेनो: । धेनो: । धेन्वो: । धेनूनां । धेन्वां धेनौ । धेन्वो: । धेनुषु । हे धे
नो हे धेनू हे धेनव: । ईकारांतस्त्रीलिंगो नदीशब्द: । हसेप: सेर्लोप: । हसोना
दिवंताच्च परस्य सेर्लोपो भवति । नदी नद्यौ नद्य: । धोर्ह्रस्व: । ईवर्णोवर्णयोर्धी
तो स्त्रियां धौ परे ह्रस्वो भवति । हे नदि । ह्रस्वविधिसामर्थ्यात् न गुण: । नदीं न
द्यौ नदी: । नद्या नदीभ्यां नदीभि: । ङितामट् । स्त्रियामिकारांतादुकारांताच्च ङि
तां वचनानां आडागमो भवति । टित्वादादौ नद्यै नदीभ्यां नदीभ्य: । नद्या: न
दीभ्यां नदीभ्य: । नद्या: । नद्यो: । नुडाम: । नदीनां । नद्यां । नद्यो: । नदीषु । एवं गौरी
सरस्वती ब्राह्मणी कुमारी किशोरी कमली कुरंगी भुजंगी नारी मातंगी गोपीप्र

नतय: । लक्ष्मीशब्दस्यैवं नत्वाभावात् सिलोपो नास्ति । लक्ष्मी: । लक्ष्म्यौ । लक्ष्म्य: ।
हे लक्ष्मि । हे लक्ष्म्यौ । हे लक्ष्म्य: । इत्यादि । स्त्री । स्त्रीभ्रुवो: । स्त्रीशब्दस्य भ्रूशब्दस्य च इ
युवौ भवत: स्वरे परे । स्त्रियौ । स्त्रिय: । हे स्त्रि । वाम्शसि । अम्शसि च परे स्त्रीशब्दस्य
भ्रूशब्दस्य च वा इयुवौ भवत: । स्त्रियं । स्त्रीं । स्त्रियौ । स्त्रिय: । स्त्री: । इत्यादि । श्री: । धो
धीतोरियुवौ स्वरे । धातोरिकारोकारयोरियुवौ भवत: स्वरे परे । श्रियौ । श्रिय: । हे श्री: ।
श्रियं । श्रियौ । श्रिय: । श्रिया । श्रीभ्यां । श्रीभि: । वेयुव: । इयुवंतात् स्त्रीयां वर्त्तमानाद्वा
ङितां वचनानामडागमो भवति । श्रियै । श्रिये । श्रीभ्यां । श्रीभ्य: । श्रिय: । श्रिया: ।
श्रीभ्यां । श्रीभ्य: । श्रिय: । श्रिया: । श्रियो: । श्रियादीनां वा मो नुट् वक्तव्य: । श्रियां । श्री
णां । ङौ परे अडागमाभावे आमोऽप्यभाव: । श्रियां । श्रियि । श्रियो: । श्रीषु । हे श्री: । एवं भ्रू
शब्दो भ्रूशब्दश्च वधूजंबादीनां नदीशब्दवत् प्रक्रिया । वधू: । ऋकारांतो मातृश २०

ब्द: । मातात्राशीतिरीर्घत्वं नत्वं पितृवत् । स्वसृशब्दस्य कर्तृशब्दवत् प्रक्रिया । गोशब्द:
पुंवत् । नौशब्दो ग्लौशब्दवत् । नौ: । नावौ । नाव: । इत्यादि । इति स्वरांतस्त्रीलिंगा: । अ
थ स्वरांता नपुंसकलिंगा: । कण्ठ्यं ने । तस्य कुलशब्दस्य प्रथमाद्वितीयैकवचने अ
तोऽम् । अकारांतान्नपुंसकलिंगात्परयो: स्यमोरम् भवति । अधो । अमीम् । यह
लोनुस्यात्सपर्यम् । कुलं । ईमौ । नपुंसकलिंगात्पर औ ईकारमापद्यते । कुले । जस्श
सोशि: । नपुंसकात्परयो: जस्शसो: शिर्भवति । उरुशिश्च सर्वस्य वक्तव्य: । नुमयम: ।
नपुंसकस्य नुमागमो भवति शौ परे यमप्रत्याहारांतस्य न भवति । मिदंत्यात्स्वरा
त्परो वक्तव्य: । नोपधाया: । नांतस्योपधाया दीर्घो भवति शौ परे धिवर्जितेषु पर
त: । पंचसु नामि चा । कुलानि । पुनरपि । कुलं । कुले । कुलानि । कुलेन । कुलाभ्यां । कुलै: ।
शेषं देववत् । एवं मूलफलकुटुंबपत्रपुष्पधनश्मश्रवादय: । स्वमोर्दे: । अन्यादेर्ग

णीस्वरयोः स्यमोस्तुर्भवति। तकारस्य दकारो वावसाने। अन्यत्। अन्यद्। अन्ये। अन्यानि। पुनरपि। अन्यतरत्। अन्यतरद्। अन्यतरे। अन्यतराणि। पुनरपि। इतरत्। इतरद्। इतरे। इतराणि। पुनः। कतरत्। कतरद्। कतरे। कतराणि। पुनः। कतमत्। कतमद्। कतमे। कतमानि। पुनरपि। शेषं देववत्। इकारांतो अस्थिशब्दः। नपुंसकास्यमोर्लुक्। नपुंसकलिंगात् स्यमोर्लुग्भवति। अस्थि। एत्वं इदुतोरस्य च एषां नपुंसके घोर्गुणो वा वक्तव्यः। उक्तं हि। संबोधने तु नसत्त्विरूपं सांतं तथा नांतमथाप्यदंतं। माध्यंदिनिर्वष्टि गुणं त्विगंते नपुंसके व्याघ्रपदां वरिष्ठः॥१॥ नामिनः स्वरे। नाम्यंतस्य नपुंसकस्य नुमागमो भवति स्वरे परे। इमौ। अस्थिनी। अस्थीनि। अस्थ्यस्थ्यास्थां शसादौ। अस्थ्यादीनां नुमागमो न भवति शसादौ स्वरे परे इकारस्य अकारो भवति। अल्लोपः स्वरेऽम्वयुक्तात् शसादौ। नोन्तस्योपधायाः अकारस्य लोपो भवति शसादौ स्वरे परे। न द्विते ङ्यि विकारे च। मकारवकारान्तसंयोगादुत्तरस्य न भवति। अस्थ्ना। अस्थिभ्यां। अस्थिभिः। अस्थ्ने। अस्थिभ्यां। अस्थिभ्यः। अस्थ्नः। अस्थ्नः। अस्थ्नोः। अस्थ्नां। वेङ्यौ। ङ्योः परयोर्वा अकारस्य लोपो भवति। अस्थ्नि। अस्थनि। अस्थ्नोः। अस्थिषु। एवं दधिसक्थि अक्षिप्रभृतयः। वारि। वारिणी। वारीणि। पुनरपि। नपुंसकस्य ह्रस्वः। नपुंसके ह्रस्वो भवति। ग्रामणि। ग्रामणिनी। ग्रामणीनि। पुनरपि। टादौ वा उक्तपुंस्कं पुंवद्वा। उक्तपुंस्कं नाम्यंतं नपुंसकलिंगं टादौ स्वरे परे पुंवद्वा भवति। ग्रामण्या। ग्रामणिना। ग्रामणिभ्यां। ग्रामणिभिः। नुमंतस्यामि दीर्घः। ग्रामणीनां। ग्रामण्यां। इत्यादि। सोमपं। कुले। सोमपे। सोमपानि। पुनरपि। इत्यादि। उकारांतो मधुशब्दः। तस्यापि नामिनः स्वरे इति नुमागमः। मधु। मधुनी। मधूनि। मधुना। मधुभ्यां। मधुभिः। मधुने। मधुभ्यां। मधु

भ्यः इत्यादि उकारांतः खलपूशब्दः खलपु खलपुनी खलपूनि पुनरपि ऐकारांतः अति
रैशब्दः आयमतिक्रांतमितिविग्रहः संध्यक्षराणामिदुतौ इति ह्रस्वत्वं अतिरि अ
तिरिणी अतिरीणि पुनरपि अ ओकारांतो उपगुशब्दः उपगु उपगुनी उपगूनि
पुनरपि इत्यादि ऋकारांतः कर्तृशब्दः कर्तृ कर्तृणी कर्तॄणि इत्यादि औका
रांत अतिनौशब्दः अतिनु अतिनुनी अतिनूनि शेषं मधुवत् इति स्वरांता
नपुंसकलिंगाः अथ हसांताः पुल्लिंगाः प्रदर्श्यंते तत्र हकारांतो अनडुह्शब्दः
पंचस्वनडुहः आमागमो वक्तव्यः सावनडुहः अनडुह्शब्दस्य सौपरे नुमागमो
भवति संयोगांतस्य लोपः संयोगांतस्य लोपो भवति हसे पदांते च हसेपसे लो
पः अनड्वान् अनड्वाहौ अनड्वाहः धावम अनडुह्शब्दस्य धौपरे आमागमो भ
वति हे अनडून् अनड्वाहौ अनड्वाहः अनड्वाहं अनड्वाहौ अनडुहः अनडुहा २२

वसांस्रंसे वस् भस् भ्रंस् ध्वंस् अनडुह् इत्येतेषां हसे पदांते च दत्वं भवति अन
डुद्भ्यां अनडुद्भिः इत्यादि गोदुह्शब्दस्य भेदः दादेर्घः दादेर्धातोर्हकारस्य घत्वं
भवति [illegible]से परे नाम्नश्वरसे पदांते च गोदुघ् सि इति स्थिते आदिजबानां झ
भांतस्य झभा सधाः धातोर्झभांतस्यादेर्जबानां झभा भवंति सध्वे
ध्वांतश्चे च परे नाम्नश्वरसे पदांते च वावसाने अवसाने वर्तमानानां झसानां
जबा भवंति चपा वा विरामो वसानं वर्णानामभावो वसानसंज्ञस्यात् गोधु
क् गोधुग् गोदुहौ गोदुहः हे गोधुक् हे गोधुग् हे गोदुहौ हे गोदुहः गोदुहं गोदु
हौ गोदुहः गोदुहा भकारादौ दादेर्घः घत्वे कृते आदिजबस्य भवे धकारे च कृते
झबेजबाः गोधुग्भ्यां गोधुग्भिः गोदुहे गोधुग्भ्यां गोधुग्भ्यः गोदुहः गोदुहोः गोदुहां

गोदुहि गोदुहोः गोधुक्षु घत्सु इति स्थिते खसे चपा झसानां किलास्सः कषसंयोगे क्षः
गोधुक्षु मधुलिहशब्दस्य भेदः होढः धातोर्हकारस्य ढत्वं भवति झसे परे नाम्नः स्वरसे
पदांते च वावसाने चपजबो मधुलिट् मधुलिड् मधुलिहौ मधुलिहः मधुलिहं मधु
लिहौ मधुलिहः मधुलिहा मधुलिड्भ्यां मधुलिड्भिः मधुलिहे मधुलिड्भ्यां मधुलिड्भ्यः इ
त्यादि भारवाहशब्दः मधुलिट्शब्दवत् शसादौ तु विशेषः किं विशेषः वाहो वौ शसा
दौ स्वरे वाहो वकारस्यौकारादेशो भवति शसादौ स्वरे परे भारौहः भारौहा इत्यादि
मित्रद्रुहशब्दस्य विशेषः द्रुहादीनां घत्वढत्वं वा द्रुहादीनां धातूनां घत्वढत्वं वा भवति
झसे पदांते च मित्रध्रुक् मित्रध्रुग् मित्रध्रुट् मित्रध्रुड् मित्रद्रुहौ मित्रद्रुहः मित्रद्रुहं
मित्रद्रुहौ मित्रद्रुहः मित्रद्रुहा मित्रध्रुग्भ्यां मित्रध्रुड्भ्यां मित्रध्रुग्भिः मित्रद्रुहि इत्यादि
तथा नत्वमुहशब्दः नत्वमुक् नत्वमुग् नत्वमुट् नत्वमुड् नत्वमुहौ नत्वमुहः इत्यादि २३

तुरासाहशब्दस्य भेदः होढः सहेषः सढि सहि रूपे सति सहेः सस्य षो भवति तुराषा
ट् तुराषाड् तुरासाहौ तुरासाहः तुराषाड्भ्यां तुराषाड्भिः इत्यादि रेफांतश्चतुरशब्दो
नित्यं बहुवचनांतः चतुरामशौ च चतुरशब्दस्याम आगमो भवति पंचसु शौ च
मिदंत्यात्स्वरात्परो वक्तव्यः चत्वारः चतुरः चतुर्भिः चतुर्भ्यः चतुर्भ्यः रः संख्या
याः रेफांतसंख्यायाः परस्यामो नुडागमो भवति णत्वं द्वित्वं च रात्सुपो द्विः च
तुर्णां चतुर्षु हे चत्वारः नकारांतो राजन्शब्दः नोपधायाः पंचसु दीर्घः नाम्नो
नो लोपश्चाधौ नाम्नो नकारस्य नागमयस्य लोपश्च भवति झसे पदांते चाधौ रा
जा राजानौ राजानः अधाविशेषणात् हे राजन् हे राजानौ हे राजानः राजानं
राजानौ अल्लोपः स्वरे खुत्वे नञकारः जञोर्ज्ञः जकार ञकार संयोगे ज्ञ इत्यादे
शो भवति राज्ञः राज्ञा लोपश्शिपुनर्नसंधिरिति नियमात् अङिः इत्यात्वं न भव

ज्ञा राजभ्यां राजभिः राज्ञे राजभ्यां राजभ्यः राज्ञः राजभ्यां राजभ्यः राज्ञः राज्ञोः राज्ञां
राज्ञि राजनि वेज्ञोः राज्ञोः राजसु एवं यज्वन् अश्मन् सुधर्मन् प्रभृतयः अम्व
युक्तादिति विनिषेधात् अल्लोपो नास्ति यज्वनः यज्वना यज्वभ्यां यज्वभिः
इत्यादि श्वन् पवन् मघवन् शब्दानां पंचसु राजन् शब्दवत् प्रक्रिया आसा
दौ तु विशेषः श्वादेः श्वादेर्वकारस्य उत्वं प्राप्नोति आसादौ स्वरे परे शुनः शुना
श्वभ्यां श्वभिः शुने श्वभ्यां श्वभ्यः शुनः श्वभ्यां श्वभ्यः शुनः शुनोः शुनां शुनि
शुनोः श्वसु युवन् शब्दे उवकारस्योत्वे कृते सवर्णे दीर्घे सह यूनः यूना युव
भ्यां युवभिः इत्यादि मघवन् शब्दस्य वकारस्योत्वे कृते पश्चात् उ ओ मघोनः
मघोना मघवभ्यां मघवभिः इत्यादि पथिन् शब्दस्य भेदः इतो संचसु पंचसु
स्यादिषु पथ्यादीनामिकारस्य अकारादेशो भवति योनुट् पथ्यादीनां थका

रस्य नुडागमो भवति पंचसु पंथन् सि इति स्थिते असौ पथ्यादीनां टेरात्वं भ
वति सौ परे पंथाः नोपधायाः पंथानौ पंथानः हे पंथाः हे पंथानौ हे पंथानः
पंथानं पंथानौ पथांटेः पथ्यादीनां टेर्लोपो भवति आसादौ स्वरे परे पथः
पथा पथिभ्यां पथिभिः पथे पथिभ्यां पथिभ्यः पथः पथिभ्यां पथिभ्यः
पथः पथोः पथां पथि पथोः पथिषु इत्यादि एवं ऋभुक्षिन् पथिन् शब्द
वत् दंडिन् शब्दस्य भेदः इनां शौ सौ इन हन पूषन् अर्यमन् इत्येतेषां शौ सौ
चाधौ परे उपधाया दीर्घो भवति दंडी नाम्नो नो लोपशधौ दंडिनौ दंडिनः दंडि हे
न् हे दंडिनौ हे दंडिनः दंडिनं दंडिनौ दंडिनः दंडिना दंडिभ्यां दंडिभिः इत्या
दि ब्रह्महा ब्रह्मणौ ब्रह्मणः हे ब्रह्महन् हे ब्रह्महणौ हे ब्रह्महणः ब्रह्महणं ब्र
ह्मणौ आसादौ अल्लोपः स्वरे अम्वसुक्को छ णादौ हनो घ्नो हंतेर्धोतो हकार

१० सुघत्वं भवति नकारे अण ति च परे घसंयोगे णत्वनिषेधार्थः ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्मह
भ्यां ब्रह्महत्तिः इत्यादि पूषा पूषणौ पूषणः हे पूषन् पूषणं पूषणौ पूष्णः षका
रणकारसंयोगे ह्न भवति पूष्णः पूष्णा पूषभ्यां पूषभिः पूष्णे पूषभ्यां पूषभ्यः पू
ष्णो ङेर्नि टिलोपो वेति केचित् पूष्णि पूषणि पूष्णोः पूषसु अर्यमा अर्यमणौ
अर्यमणः हे अर्यमन् इत्यादि संख्याशब्दः पंचन् प्रभृतयो बहुवचनांताः त्रि
लिंगेषु स्वरूपाः पंचन् जस् इति स्थिते जश्शसोर्लुक् षकार नकार संख्यायाः
परस्यामोनुडागमो भवति नोपधायाः नाम्नो नो लोपश्शधौ पंचानाम योर्जश्शसो
र्लुक् भवति लुकि न तन्निमित्तं पंच पंच पंचभिः पंचभ्यः पंचभ्यः ष्णः षकारणका
र संख्यायाः परस्यामोनुडागमो भवति नोपधायाः नाम्नो नो लोपशधौ पंचानां
पंचसु हे पंच एवं सप्तन् नवन् दशन् प्रभृतयः अष्टन् शब्दस्य भेदः अष्टनोडौ वा २५

अष्टन्शब्दस्य रयो जश्शसोर्वा औ भवति डित्वात् टिलोपः अष्टौ अष्टः पक्षे अ
ष्टौ अष्टः वा सुवा आ आ सु अष्टन् आ सुपरासु विभक्तिषु वा आत्वं भवति अ
ष्टाभिः अष्टभिः अष्टाभ्यः अष्टभ्यः अष्टानां अष्टासु अष्टसु मकारांतो इ
दम् शब्दः इदमोयं पुंसि इदम् शब्दस्य पुंसि विषये अयं आदेशो भवति सिस
हितस्य अयं द्विवचनादौ त्यदादेष्टेरिति सर्वत्र आकारः इद औ इति स्थिते द
स्य मः त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे इमौ सर्वादित्वात् जसी इमे
त्यदादीनां घेरभावः इमं इमौ इमान् अनटोसो इदमो नादेशो भवति
टोसोपरयोः टेन अनेन स्भ्यः इदम सकारे भकारे च परे अकारादेशो भव
ति कृतत्वस्य अडीइति आत्वं आभ्यां भिस् भिस इदमदसोर्भिस् भिसेव
भवति न भकारस्याकारः एत्वि बहुत्वे एभिः अस्मै आभ्यां एभ्यः अ

स्मात् । आभ्यां । एभ्यः । अस्य । अनयोः । एषां । अस्मिन् । अनयोः । एषु । किम्शब्द
स्य त्यदादेरः स्यादौ इति सर्वत्राकारादेशो भवति । सर्वशब्दवद्रूपं नेयम् । कः
कौ । के । कं । कौ । कान् । केन । काभ्यां । कैः । इत्यादि । धकारांतस्य तत्वबुध
शब्दः । तस्य रसे पदांते च । आदिजबानामिति भकारः । वावसाने । तत्वभुत्
तत्वभुद् । तत्वबुधौ । तत्वबुधः । तत्वबुधं । तत्वबुधौ । तत्वबुधः । तत्वबुधा । त
त्वबुद्भ्यां । तत्वबुद्भिः । इत्यादि । जकारांत सम्राजशब्दः । छशषराजादेः षः । छ
कारांतस्य शकारांतस्य षकारांतस्य च । राज् यज् सृज् मृज् भ्राजादेश्च षकारो
भवति । धातोर्झसे परे नाम्नस्वरसे पदांते च । षस्य षत्वं डत्वं निषेधार्थं । षोडः
षकारस्य डत्वं भवति । धातोर्झसे परे नाम्नस्वरसे पदांते च । वावसाने । सम्रा
ट् । सम्राड् । सम्राजौ । सम्राजः । हे सम्राट् । हे सम्राजौ । हे सम्राजः । सम्राजं । स २५

म्राजौ । सम्राजः । सम्राजा । सम्राड्भ्यां । सम्राड्भिः । सम्राजे इत्यादि । एवं विराजाद
यः । दकारांतस्य त्यदादयः । तेषां त्यदादेरः स्यादाविति सर्वत्राकारे कृते सर्व
शब्दवद्रूपं नेयम् । त्यः । त्यदादेस्तकारस्य सत्वं भवति सौ परे । स्यः । त्यौ । त्ये
त्यं । त्यौ । त्यान् । त्येन । त्याभ्यां । त्यैः । त्यस्मै इत्यादि । सः । तौ । ते । तं । तौ । तान्
इत्यादि । यः । यौ । ये । यं । यौ । यान् । येन । याभ्यां । यैः । इत्यादि । एषः । एतौ
एते । एतदोरन्वादेशे द्वितीयाटौस्वरे नो वा वक्तव्यः । एतं । एनं । एतौ । एनौ
एतान् । एनान् । एतेन । एनेन । एतयोः । एनयोः । एतेषां । एतेषु । छकारांत तत
त्वप्राछ्शब्दः । षस्य डत्वे । वावसाने । तत्वप्राट् । तत्वप्राड् । तत्वप्राछौ । तत्वप्रा
छः । हे तत्वप्राट् । हे तत्वप्राड् । हे तत्वप्राछौ । हे तत्वप्राछः । तत्वप्राछं । तत्वप्राछौ
तत्वप्राछः । तत्वप्राछा । तत्वप्राड्भ्यां । तत्वप्राड्भिः । तत्वप्राछे इत्यादि । यकारांतः

१२० अग्निमथ्शब्दः॥ वावसाने॥ अग्निमत्॥ अग्निमद्॥ अग्निमथौ॥ अग्निमथः
१ अग्निमथ्भ्यां॥ अग्निमत्सु॥ चकारांतः॥ प्रत्यंच्शब्दः॥ अञ्चेः पंचसु नुमागमो व
क्तव्यः॥ प्रत्यंच् सि इति स्थिते॥ स्तोश्चुभिश्चुः॥ इति ञकारः॥ संयोगांतस्य लोपः॥
चोः कुः॥ चवर्गस्य कवर्गादेशो भवति॥ धातोर्झसे परे नाम्नश्चासे पदांते च य
थासंख्येन ङकारः॥ प्रत्यङ्॥ प्रत्यंचौ॥ प्रत्यंचः॥ हे प्रत्यङ्॥ प्रत्यंचं॥ प्रत्यंचौ॥
अचेरलोपो दीर्घश्च॥ अंचेर्लुप्तनाकारस्य लोपो भवति॥ पूर्वस्य च दीर्घः शसादौ
स्वरे परे तद्धिते ईपि कारे च॥ प्रतीचः॥ प्रतीचा॥ प्रत्यग्भ्यां॥ प्रत्यग्भिः॥ प्रतीचे॥
प्रत्यग्भ्यां॥ प्रत्यग्भ्यः॥ इत्यादि॥ प्रत्यक्षु॥ एवं तिर्यंच् प्रभृतयः॥ तिर्यङ्॥ तिर्यंचौ॥
तिर्यंचः॥ हे तिर्यङ्॥ तिरश्चादय॥ तिरश्चादयो निपात्यंते शसादौ स्वरे परे तद्धि
ते ईपि कारे च॥ तिरश्चः॥ तिरश्चा॥ तिर्यग्भ्यां॥ तिर्यक्षु॥ उदीच्॥ उदीचा॥ समिचः॥ २२

समिचा॥ इत्यादि॥ तकारांतो उकारानुबंधो महत्शब्दः॥ ऋतो नुम्॥ उकारानुबंधस्य
ऋकारानुबंधस्य च नुमागमो भवति धुसि पंचसु॥ सौ च॥ नसंमहतो धोर्दीर्घः॥ सौ च॥
नसंतस्याप्शब्दस्य च महतश्चोपधस्य च दीर्घो भवति पंचसु धिवर्जितेषु परतः॥ सं
योगांतस्य लोपः॥ महान्॥ महांतौ॥ महांतः॥ हे महन्॥ महांतं॥ महांतौ॥ महतः॥ म
हता॥ महद्भ्यां॥ महद्भिः॥ इत्यादि॥ तकारांतो मरुत्शब्दः॥ तस्य वावसाने॥ मरु
त्॥ मरुद्॥ मरुतौ॥ मरुतः॥ इत्यादि॥ अग्निचित् प्रभृतयः॥ ऋकारानुबंधो भव
त्शब्दः॥ अत्वसोः सौ॥ अत्वंतस्यासंतस्य च उपधाया दीर्घो भवति॥ धिवर्जिते धि
धुसौ च॥ भवान्॥ भवंतौ॥ भवंतः॥ भवता॥ भवद्भ्यां॥ भवद्भिः॥ इत्यादि॥ एवं पच
त्शब्दः॥ पचन्॥ पचंतौ॥ पचंतः॥ हे पचन्॥ पचंतं॥ पचंतौ॥ पचतः॥ पचता॥ पच
द्भ्यां॥ पचद्भिः॥ इत्यादि॥ षकरांतः॥ षष्शब्दः॥ छशषराजादेः षः॥ इति षत्व भवति

१० षोडः इति ढत्वं वावसाने चपा अबे जव विट् विड् विशौ विशः विशं विशौ विशः
८ इत्यादि षकारांतो षष्‌शब्दो नित्यं बहुवचनांतः त्रिलिंगेषु रूपः जसोर्लुक्
षट् षट् षड्भिः षड्भ्यः षड्भ्यः ष्णः इति नुमागमो भवति ड्णः संख्यासंबंधिनो
डकारस्य णत्वं भवति नामिपरे षण्णां षट्सु क्वचित्सदांतनायश्चली[illegible]ा दोष
शब्दस्य भेदः दोषांरः दोष सजुष् आशिष् इति विषमस्तीनां षकारस्य रेफो भव
ति [illegible] रसेपदांते च दोः दोषौ दोषः दोषं दोषौ इत्यादौ स्वरे नांतस्याव
कल्पः दोषः षकारणकारसंयोगे ष्णः भवति दोषा दोष्णा दोर्भ्यां दोर्भिः
इत्यादि सजुषसिषोर सेपदांते च दीर्घ[illegible]ः सजूः सजुषौ सजुषः स
जुषं सजुषौ सजुषः सजुषा सजूर्भ्यां सजूर्भिः इत्यादि आशीः आशि
षौ आशिषः हे आशीः सकारांत पुंस शब्दः पुंसो असुङ् पुंसशब्दस्य २८

असुङ् आदेशो भवति पंचसु परेषु ङकारो ङित्कार्य्यार्थः उकारानुमवि
धानार्थः उगितो नुम इति नुमागमः नसंमहतो धौ दीर्घः संयोगांतस्य लोपः
इति सलोपः पुमान् पुमांसौ पुमांसः हे पुमन् हे पुमांसौ हे पुमांसः पुमांसं
पुमांसौ पुंसः पुंसा पुंभ्यां पुंभिः इत्यादि असंभवे पुंसककसौ असंभे
र्थे वा अपुमन्‌शब्दस्य कगागमो भवति सुपि परे स्कोराद्योष्व संयोगाद्योः स
कारककारयो र्लोपो भवति वी तोर्भसे परे नाम्न ष्वरसे पदांते च क्विलात्वसः
इति षत्वं कषसंयोगे क्षः कषसंयोगे क्षो भवति पुंक्षु विदांते क वेदा स्यामने
विवक्षायां बहुत्वाच्चाभवं पुमन्‌शब्दस्य कगागमो भवति क्वचिन्नामिनो लोपश्च
नामिनः परस्य सकारककारयो र्लोपो भवति वेपरे पुंसु अनंत्र पुंसु सकारां
त उकारानुबंधो विद्वस्‌शब्दः उगितो नुम इति पंचसु नुमागमः नसंमहतो धौ

।र॰
९

दीर्घः विद्वान् विद्वांसौ विद्वांसः विद्वांसं विद्वांसौ वसोर्वउः वस संवंधिनवका
रस्य उत्वं भवति शसादौ स्वरे परे न ङिते पिकारे च उत्वं विदुषः विदुषा वसांसे
द् इति दत्वं विद्वद्भ्यां विद्वद्भिः विदुषे इत्यादि एवं चन्द्रमस् शब्दः चन्द्रमा चन्द्र
मसौ चन्द्रमसः हे चंद्रमसः हे चंद्रमसौ हे चंन्द्रमसः सुवचस् शब्दे तु अत्वसो
इत्यात्वम् सुवचाः सुवचसौ सुवचसः हे सुवचः हे सुवचसौ हे सुवचसः सुवच
सं सुवचसौ सुवचसः सुवचसा स्रोर्विसर्गः रवे इति उत्वे सुवचोभ्यां सुवचो
भिः इत्यादि उशनस् शब्दस्य भेदः उशनसां उशनस् पुरुदंसस् अनेहसां
च इति तेषां सेरधेर्डा भवति डित्वाट्टिलोपः उशना उशनसौ उशनसः उशन
सं उशनसौ उशनसः उशनसा धोनां नतादंतनासा वत्ता वा वक्तव्याः हे उशा
नन् हे उशन: हे उशनाः इत्यादि सकारांतो अदस् शब्दः तस्य अदस् शब्दस्य भे

दः त्यदादेष्टेरस्यादविति सर्वत्राकारः अदस् सि इति स्थिते सौ सः अदसो दकार
स्य सौ परे सत्वं भवति सेरौ अदसः सेरौ भवति असौ द्विवचने अद औ इति
स्थिते इस्यमः त्यदादीनां दकारस्य मत्वं भवति स्यादौ स्वरे परे मादू उश्च ऊश्च
ऊ अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकार दीर्घस्य दीर्घोउकारो भवति
अमू बहुवचने सर्वादित्वाजसी अद इ ए अमे इति जातः एरिबहुत्वे अ
दस एकारस्य ईकारो भवति अमी अमुम् अमू अमून् मत्वे उत्वे कृते टानास्त्रियां
अमुना अङ्गिसात्वं पश्चान्मादुकारः अमूभ्यां अमीभिः अमुष्मै अमूभ्यां
अमीभ्यः अमुस्मात् अमूभ्यां अमीभ्यः अमुस्यः ओसि एत्वे आदेशे च कृ
ते पश्चान्मादुकारः अमुयोः अमीषां अमुस्मिन् अमुयोः अमुषु सामामे
अदसः कस्यादि वच अमुकः अमुकौ अमुके शेषं सर्ववत् इति हसांताः पु

२० ल्लिंगाः ॥ अथ हलंता स्त्रिलिंगा प्रदर्श्यंते ॥ तत्र हकारांतो उपानहशब्दः ॥ नहो धः ॥ न
हो हकारस्य धकारादेशो भवति ॥ सेपदांते च ॥ वावसाने चपजबौ ॥ उपानत् ॥ उपा
नद् ॥ उपानहौ ॥ उपानहः ॥ उपानहं ॥ उपानहौ ॥ उपानहः ॥ उपानहा ॥ उपानद्भ्यां ॥ उपा
नद्भिः ॥ उपानत्सु ॥ इत्यादि ॥ वकारांतो दिवशब्दः ॥ दिव औ ॥ दिवो वकारस्य औकारा
देशो भवति सौ परे ॥ द्यौ ॥ दिवौ ॥ दिवः ॥ हे द्यौ ॥ हे दिवौ ॥ हे दिवः ॥ वामि ॥ दिवो वकार
स्य वा आत्वं भवति अमि परे ॥ द्यां ॥ दिवं ॥ दिवौ ॥ दिवः ॥ दिवा ॥ उ रसे ॥ दिवो वकारस्य
उकारादेशो भवति रसे परे ॥ द्युभ्यां ॥ द्युभिः ॥ इत्यादि ॥ रेफांत चतुरशब्दो नित्यं बहुवच
नांतः ॥ त्रिचतुरो स्त्रियां ॥ तिसृ चतसृ वत् ॥ स्त्रियां वर्त्तमानयोस्त्रिचतुरशब्दयोः ॥ तिसृ
चतसृ इत्येतावादेशौ भवतः ॥ ऋकारस्य ऋकारवत् ॥ न तः स्वरादि सारन भवति ॥ च
तस्रः ॥ चतस्रः ॥ तिसृचतसृ छंदसि वा ॥ तिसृचतसृ छंदसि वा नामि परे दीर्घो भव ३०

ति ॥ चतसृणां ॥ चसृणां ॥ चतसृषु ॥ हे चतस्रः ॥ त्रिशब्दः ॥ बहुवचनांतः ॥ तिस्रः ॥ तिस्रः ॥
तिसृभिः ॥ तिसृभ्यः ॥ २ ॥ तिसृणां ॥ तिसृणां ॥ तिसृषु ॥ हे तिस्रः ॥ रेफांतो गिरशब्दः ॥
र्वोर्विहसे ॥ धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः ॥ गीः ॥ गिरौ
गिरः ॥ हे गीः ॥ गिरौ ॥ हे गिरः ॥ गिरं ॥ गिरौ ॥ गिरः ॥ गिरा ॥ गीर्भ्यां ॥ गीर्भिः ॥ इत्यादि ॥ एवं पुरधु
रादयः ॥ धकारांतः समिधशब्दः ॥ वावसाने ॥ समित् ॥ समिद् ॥ समिधौ ॥ समिधः ॥ इत्या
दि ॥ भकारांतः ककुभशब्दः ॥ वावसाने ॥ ककुप् ॥ ककुब् ॥ ककुभौ ॥ ककुभः ॥ हे क
कुप् ॥ हे ककुब् ॥ हे ककुभौ ॥ हे ककुभः ॥ ककुभं ॥ ककुभौ ॥ ककुभः ॥ ककुभा ॥ ककु
ब्भ्यां ॥ ककुब्भिः ॥ ककुप्सु ॥ इत्यादि ॥ दकारांताः त्यद् तद् यद् एतद् शब्दाः ॥ तेषां त्यदा
देष्टेरिति सर्वत्राकारः ॥ आवतः स्त्रियां ॥ अकारांतानां नाम्नः स्त्रियां वर्त्तमानादा
प्प्रत्ययो भवति ॥ पकार इत्कार्यार्थः ॥ सिलोपः ॥ सवर्णे दीर्घः सः ॥ इति दीर्घे कृते स्त्रि

१०
१

त्रिलिंगे सर्वशब्दवत् रूपं नेयम् स्या ते सा: सा ते ना: या ये या: एना एने एना:
सत्वं इति सूत्रेण षत्वं एषा एते एता: एवं किमशब्द: का के का: कां के का: कया
काभ्यां काभि: कस्यै काभ्यां काभ्य: कस्या: काभ्यां काभ्य: कस्या: कयो: कासां
कस्यां कयो: कासु इयं म स्त्रियं इदमशब्दस्य स्त्रियमियं भवति सिसहितस्य इयम्
इमे इमा: द्विवचनादौ सदादेष्टेरत्वे कृते दस्य म: मत्वे इमां इमे इमा: अनटौसि
रिति अनादेश: टौस्वरे अनया आभ्यां आभि: अस्यै आभ्यां आभ्य: अस्या:
आभ्यां आभ्य: अस्या: अनयो: आसां अस्यां अनयो: आसु वकारांतो त्वच्
शब्द: चो: कु रिति कुत्वं वावसाने त्वक् त्वग् त्वचौ त्वच: हे त्वक् हे त्वग् हे त्वचौ
हे त्वच: त्वचं त्वचौ त्वच: त्वचा त्वग्भ्यां त्वग्भि: त्वक्षु एवं रुजशब्दान्रुक् तप:
पकारांतो ऽप्शब्दो नित्यं बहुवचनांत: अप् जस् इति स्थिते नसं महतो धोर्दी ३१

र्घ: आप: द्वितीयाबहुवचने दीर्घत्वं न पंचसु इति विशेषणात् अप: भिदपां
अपादीनां पकारस्य भकारे परे दत्वं भवति अद्भि: अभ्य: अ अपां अप्सु
हे आप: शकारांतो दिशशब्द: दिशांक: दिश् स्पृश् मृश् इत्यादीनां रसे पदांते
चकत्वं भवति दिक् दिग् दिशौ दिश: हे दिक् दिग् हे दिशौ हे दिश: दिशं
दिशौ दिश: दिशा दिग्भ्यां दिग्भि: दिक्षु इत्यादि षकारांतो आशिष्शब्द: सजु
षाशिषो रसे पदांते च दीर्घ वक्तव्य: सजुषशब्द वद्रूपं नेयम् आशी: आशिषौ
आशिष: आशिषं आशिषौ आशिष: हे आशी: त्रिलिंगस्य अदशब्दस्य सौ
न विशेष: द्विवचनादौ तु टेरत्वे कृते आ बत: स्त्रियामिस्याप: दीर्घे विभक्तिकार्यं
च पश्चात् मात् इति दीर्घस्य दीर्घ: ह्रस्वस्य ह्रस्व उकार: ऊकार: असौ अमू
अमू: अमुं अमू अमू: अमुया अमूभ्यां अमूभि: अमुष्यै अमूभ्यां अमू

२० भ्यः ॥ अमुष्याः ॥ अमूभ्यां ॥ अमूभ्यः ॥ अमुष्याः ॥ अमुयोः ॥ अमूषां ॥ अमुस्मिन् ॥ अमु
योः ॥ अमूषु ॥ इति श्रीहसांता स्त्रीलिंगाः ॥ अथ हसांता नपुंसकलिंगाः प्रदर्श्यंते ॥
तत्र रेफांतो वार् शब्दः ॥ नपुंसकस्य मोर्लुक् ॥ वाः ॥ वारी ॥ वारि ॥ पुनरपि ॥ अयमूर
ति विशेषेण नुम् न भवति ॥ वारा ॥ वार्भ्यां ॥ वार्भिः ॥ वारे ॥ वार्भ्यां ॥ वार्भ्यः ॥ वारः ॥ वार्भ्यां
वार्भ्यः ॥ वारः ॥ वारोः ॥ वारां ॥ वारि ॥ वारोः ॥ वार्षु ॥ हे वाः ॥ हे वारी ॥ हे वारि ॥ इत्यादि ॥ चतु
स्शब्दे तु चतुरामशोच ॥ चत्वारि ॥ चत्वारि ॥ चतुर्भिः ॥ चतुर्भ्यः ॥ चतुर्भ्यः ॥ चतुर्णां ॥ चतुर्षु
हे चत्वारि ॥ नकारांतो अहन् शब्दः ॥ अहः ॥ अहन् शब्दस्य नकारस्य सकारादेशो
भवति ॥ रसे पदांते च ॥ सोर्विसर्गः ॥ अहः ॥ ईमो ॥ अह्नी ॥ वेड्यो ॥ अह्नी ॥ नोपधाया इति
दीर्घः ॥ अहानि ॥ पुनरपि ॥ अह्ना ॥ अहोभ्यां ॥ अहोभिः ॥ इत्यादि ॥ ब्रह्मन् शब्दस्य रसेप
दांते च नलोपो वक्तव्यः ॥ ब्रह्म ॥ ब्रह्मणी ॥ ब्रह्माणि ॥ पुनरपि ॥ धौ नपुंसकानां नलो ३२

वाच्यः ॥ हे ब्रह्मन् ॥ हे ब्रह्मणी ॥ हे ब्रह्माणि ॥ ब्रह्मणा ॥ ब्रह्मभ्यां ॥ ब्रह्मभिः ॥ इत्यादि ॥ एवं चर्म
न् कर्मन् ब्रह्मन् नामन् प्रभृतयः ॥ नां नतो दन्तताच्च छंदसि ङिः ॥ सिश्यो वा लोपो व
क्तव्यः ॥ छंदस्यागमजानामजया लोपा लोपो वा वक्तव्यो ॥ न दीर्घत्वं निवर्त्तनं परस्मै
व्योमन् ॥ सर्वाभूतानि ॥ त्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति ॥ स्यादा विविशेष
णात् ॥ त्यत् तत् यत् एतत् इदं ॥ त्यत् त्यद् त्ये त्यानि ॥ तत् तद् ते तानि ॥ यत् यद्
ये यानि ॥ एतत् एतद् एते एतानि ॥ पुनरपि ॥ अन्वादेशे तु नपुंसके द्वितीयैक
वचने एनदिति वाच्यं ॥ तृतीयादौ सर्वत्र पुंवत् ॥ इदं इमे इमानि ॥ चकारांतो प्रत्यच
शब्दः ॥ चोःकु ॥ चवर्गस्य कवर्गः ॥ प्रत्यक् प्रत्यग् प्रतीची प्रत्यंचि ॥ २ ॥ नकारांतो जग
त्शब्दः ॥ जगत् ॥ जगती ॥ जगंति ॥ २ ॥ जगता ॥ जगद्भ्यां ॥ जगद्भिः ॥ इत्यादि ॥ महत् शब्दे तु
महत् महती ॥ नसन्महतोः इति दीर्घत्वं ॥ महांति ॥ २ ॥ महता ॥ महद्भ्यां ॥ महद्भिः ॥ इत्यादि

सा०र० सकारांतपमस् तेजस् वचस् प्रभृतयः ॥ पयः ॥ पयसी ॥ पयांसि ॥ पुनरपि ॥ पयसा ॥ हबे
३ पयोभ्यां ॥ पयोभिः ॥ इत्यादि ॥ एवं तेजस् वचस् इत्यादयः ॥ षकारांतो धनुष् हविष् आ
युष् प्रभृतयः ॥ धनुः ॥ धनुषी ॥ धनूंषि ॥ हविः ॥ हविषी ॥ हवींषि ॥ इत्यादि ॥ अदस् श
ब्दस्य मोर्दुकि कृते स्त्रीविंगः ॥ द्विवचने टेरत्वे कृते मत्वीत्वे ॥ अमु ॥ अमुनी ॥ अमूनि
अमुना ॥ अमूभ्यां ॥ अमीभिः ॥ अमुष्मै ॥ अमूभ्यां ॥ अमीभ्यः ॥ अमुष्मात् ॥ अमूभ्यां
अमीभ्यः ॥ अमुष्य ॥ ओसि एत्वे आदेशे च कृते पश्चान्मादुकारः ॥ अमुयोः ॥ अ
मीषां ॥ अमुष्मिन् ॥ अमुयोः ॥ अमीषु ॥ इति हसांता नपुंसकलिंगाः समाप्ताः ॥ अथ
युष्मदस्मदोः स्वरूपं निरूप्यते ॥ वाच्यमिसुच्यते भेदं न लिंगं भजते तु यः ॥ क्रो
षएव मालीति वाच्यलिंगः स उच्यते ॥ एतयोस्तु वाच्यलिंगत्वात् त्रिषु लिंगेषु समा
नरूपं ॥ त्वं अहं सिना युष्मदस्मदोः सिसहितयोः त्वमहमित्येतावादेशौ भवतः ३३

यथासंख्येन त्वं अहं युवावौ द्विवचने युष्मदस्मदोर्द्विवचने परे युव आव इत्ये
तावादेशौ भवतः ॥ आमो युष्मदस्मदोः परस्यौ आम भवतः ॥ युवां ॥ आवां ॥ यूयं
वयं जसा जसा सहितयोर्युष्मदस्मदोर्यूयं वयं मित्येतावादेशौ भवतः ॥ यूयं
वयं त्वन्मदेकत्वे युष्मदस्मदोः त्वत् मत् इत्येतावादेशौ भवतः ॥ एकत्वे गम्यमा
ने ॥ आमसभो युष्मदस्मदोः टेरात्वं भवति ॥ अमि सकारे नि सि च परे ॥ त्वां मां
युवां ॥ आवां ॥ त्वदादेष्टेरत्वे कृते शस्नोरिति दीर्घत्वं शसो नो वक्तव्यः ॥ युष्मान् ॥ अस्मा
न् ॥ त्वन्मदादेशे च कृते एयष्टौ ॥ युष्मदस्मदोष्टेरेत्वं भवति टाङि इत्येतयोः पर
योः ॥ आयादेशः ॥ त्वया ॥ मया ॥ युवाभ्यां ॥ आवाभ्यां ॥ युष्माभिः ॥ अस्माभिः ॥ तुभ्यं मह्यं
ङया ङे सहितयोर्युष्मदस्मदोस्तुभ्यं मह्यं इत्येतावादेशौ भवतः ॥ तुभ्यं ॥ मह्यं ॥ युवाभ्यां
आवाभ्यां ॥ भ्यस भ्यं युष्मदस्मदोः परो भ्यस भ्यं भवति सकारो भकारादित्वे भ्याव

स०
७
ता

सर्वाभेनवैत्वन भवत: युष्मभ्यं अस्मभ्यं ङसिभ्यसोस्तु: पंचम्या ङसिभ्यसोस्तु
र्भवति आकार: सर्वादेशार्थ: त्वत् मत् युवाभ्यां आवाभ्यां युष्मत् अस्मत् ॥ त
व मम ङसा सहितयोर्युष्मदस्मदो स्तवमम इत्येतावादेशौ भवत: तव मम यु
वयो: आवयो: सर्वादित्वा सुट् सामाकं युष्मदस्मदो: पर: साम आकं भवति
युष्माकं अस्माकं त्वयि मयि युवयो: आवयो: युष्मासु अस्मासु अथान
योरादेशविशेषो विधिर्निरूप्यते युष्मदस्मदो षष्ठी चतुर्थी द्वितीयास्विस्तेमेवां
नौ वस् नसौ युष्मदस्मदोर्यथासंख्येनामी आदेशा भवंति किंदृशयो षष्ठी
चतुर्थी द्वितीयासहितयो: तत्रैकवचने सहतेमेतवत: ॥ द्विवचने वांनौ बहु
वचने वस्नसौ स्वामी ते स समायात: स्वामी मे ग्रामसंगत: नमस्ते भगवन्
रूपो देहि मे मोक्षमव्ययम् ॥१॥ स्वामी वां स नहासौ ब्रैर्हष्टो नो दानयाचनां राज्ञो ३४

वां दाम्पते दानं ज्ञानं नौ मधुसूदन ॥२॥ देवो वाम् अवतात् विष्णुर्नरकान्नो जनार्दन: स्वा
मी वो वृजवान् राजा स्वामी नो सौ जनार्दन: ॥३॥ नमो वो ब्रह्मविद्भ्यो ज्ञानं नो दीय
तां धनं स्नानं दानं व: अपश्याम: पश्यामो न: सुदु:खिन: ॥४॥ त्वाम् माम् अमा
सहितयोर्युष्मदस्मदो स्त्वामा इत्येतावादेशौ भवत: पश्यामि त्वा मदालीढं पश्य
मां दम्भेदकम् पश्यामि त्वा जगत्स्रष्टं पश्य मां जगतां पतिं नादौ पदादौ वर्त्तमान
योर्युष्मदस्मदोर्नैते आदेशा भवंति तव येशात्रवो राजन् मम तेप्यतिशात्रव:
तव मित्राणि यानि स्यु: मम मित्राणि तान्यपि ॥५॥ संबोधनपदादग्रे न भवंति व
सादय: हे राम तव दासोस्मि हे राम त्वां शरणं गत: ॥६॥ रूढो विश्वेश्वरो देवो युष्माकं
कुलदेवता स एव भगवान्नाथो अस्माकं पापनाशन: ॥७॥ चादिभिश्च चादि
भिरपि योगेनैते आदेशा भवंति तव च मम च मैत्री चंद्ररेषेव वर्द्धते पांतु वो ना

सा रसिंहस्य नखलांगलकोटय: २ हिरण्यकस्यपोर्वक्षक्षेत्रसृक्कर्द्दमारुणा: १ चादि
१ निपात ॥ च वा ह अह एवं नूनं पृथक् विना नाना स्वस्ति अस्ति शिषा
मृषा मिथ्या मिथस् अथ अथो घस् स्वस् उच्चैस् नीचैस् स्वर अंतरा प्रा
तर् पुनर् भूयस् अहो स्विद् ऋते अंतरेण अंतरा नमस् अलं कृतं अ
मा नो ना प्रतिषेधो इसत् किल खलु वै आरात् सकं साकं समं भृशं यत् तत्
स्वराश्च इत्येवं चादिर्गणो निपातसंज्ञो भवति त्रादि विभक्त्यर्थे निपात्यंते
ति तस्मिन्निति तत्र यस्मिन्निति यत्र कस्मिन्निति कुह कुत्र तस्मिन् काले तदा त
स्मिन् काले कदा यस्मिन् काले यदा तेन प्रकारेण तथा यथा कथ्यादिति कथं
अस्मिन्निति इत्थम् तस्मादिति ततः कुतः यतः अतः इतः सार्वविभक्तिकः तस्
सस्येको पूर्वतः परतः पूर्वस्मिन्निति पुरस्तात् अधस्तात् परस्मिन्निति परेण

दक्षिणस्यां दिशि इति दक्षिणाहि वसंति चांडालाः आहि च दूरे दूरेर्थे वाच्ये आहि
च प्रत्ययो भवति उत्तरस्यां दिशि इति उत्तरा वसंति ब्राह्मणाः किमः सामान्ये चि
दादि कश्चित् कश्चन कचन तदधिनकार्त्तसन्योर्वी स्यात् राजाधीनं राज
सात् सर्वं भस्म इति भस्मसात् ऊर्युररी अंगीकरणे ऊरीकृत्य उररीकृत्य सद्यादि
काले निपात्यंते सद्य अद्य सपदि अधुना इदानीं सांप्रतं संप्रति पूर्वस्मिन्नि
ति पूर्वेद्युः परेद्युः अन्येद्युः अपरेद्युः यर्हि तर्हि यदि सिघ्रं फटितु पूर्वं प्रादि
रुपसर्गाः प्र परा अप सम अनु अव निर् दुस् दुर् वि आङ् नि अधि अपि
अति सु उत् अभि प्रति परि उप अत् अंतर आविः अयं गणः उपसर्गसं
ज्ञिकः आख्याते उपसर्गा आख्याते प्रयोक्तव्याः भवति द्व्ययम् तदिदं चादि
त्वात् रूपम व्ययसंज्ञं स्यात् क्त्वादंतं च क्त्वादि अंतं यस्य तदव्ययसंज्ञं भवति क्त्वा

१० कापतुम नमःशस्त धा श्चिवत् अव्ययाद्विभक्तेर्लुक् अव्ययात्परस्य विभक्तेर्लुक् भव
ति ननु शब्दनिर्देशे अव्ययानां च न लिंगादिनियमः उक्तं हि सदृशं त्रिषु लिंगेषु सर्वा
सु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् उक्तोन्यलिंगानिव्यानि इति
अव्ययः अधुना लिंगविशेषा विनिज्ञापयिषया स्त्रीप्रत्ययाः प्रदर्श्यंते आबतः
स्त्रियां जाया माया मेधा अम्बा धारा इत्यादि अजादिभ्याप् वक्तव्यः अजा एड
का कोकिला बाला शूद्रा गणिका यका सका वकुबालका इत्यादि काप्यतः का
पि इः अतः स्त्रियां कापि परे ह्रस्वस्यकारस्य इकारो भवति कारिका पाचिका
पाठिका साटिका वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हलंतानां
यथा वाचा निशा दिशा अपिधानम् अवगाह विगाह इति निधी अवगाहः इ
ति निधी वगाह ह्रस्वो वा स्त्रियां कापि परे तरादौ च पूर्वस्य ह्रस्वो भवति वेणिका ३६

वेणीका नदिका नदीका श्रेयसितरा श्रेयसीतरा नीकादौ न भवति वाग्रहणादेव
निश्चयेन यरंश्चनेके ष्वेंति तिनिपातानामनेकार्थत्वात् नऋ ईप् नकारांतादृका
रांताद्दणंताच्च स्त्रियामीप् प्रत्ययो भवंति आकारांतादपि मातृस्वस्रादेर्न भवति द
ण्डिनी दंतिनी कारिणी मालिनी इपि राज्ञो अल्लोपो वक्तव्यः राज्ञी शुनी मघोनी क
र्त्री हर्त्री औपगवी औपगव्यो औपगव्यः औपगवी इत्यादि यस्य लोपः इप्यस्य
प्यय नस्य लोपो भवति स्वरे तद्धिते च इपि कारे च परे षिटुतः षकारटकारउकार
ऋकाराणुबंधात् स्त्रियामिप् प्रत्ययो भवति षपराकी टकुरुचरी उगोमती ऋ
पचंती अपठंती ऌ दीव्यंती इत्यादि नदादेः नदादेर्गणात् स्त्रियामीप् प्रत्ययो भव
ति नदी गौरी गोनमी इत्यादि इंद्रादेरानिप् वक्तव्यः इंद्राणी भवानी सर्वाणी मा
तुलोपाध्याय क्षत्रियस्त्र्यां वा आनीप् प्रत्ययो भवति मातुलानी मातुली उपाध्या

० यनी । उपाध्यायी । या स्वयं व्याख्यात्री सा उपाध्याया । अर्यक्षत्रियाभ्यां मानिप् वा स्वार्थे
आर्या । अर्याणी । क्षत्रिया । क्षत्रियाणी । ईप् समाहारे गुण्वा द्वयी त्रयी । त्रयाणां वेदानां स
माहारः त्रयी । पुंयोगे च । शूद्रपुरुषयोगात् अकारांतात् पुंयोगे च स्त्रियामीप् प्रत्ययो
भवति । शूद्री । गणकी । चकारात् गोपालिकादेः पुंयोगे च ईप् प्रत्ययो न भवति । गोपालि
का । अश्वपालिका । जातेरयोपधात् । जातिवाचिनो कारोपधाद् अकारांतात् स्त्रियामी
प् प्रत्ययो भवति । मेखी । सूकरी । कुक्कुटी । ब्राह्मणी । हंसी । अयकारोपधग्रहणात्
क्षत्रिया । वैश्या । प्रथमवयोवाचिनो नाईप् वक्तव्यः । कुमारी । किशोरी । कलभी । वधूटी
चिरंटी । तुलनी । तरुणी । प्रथमग्रहणात् । अस्थविरा वृद्धा । अनतग्रहणात् शिशुः । स्वां
गात् । स्वांगवाचिनो वा स्त्रियामीप् प्रत्ययो भवति । सुमुखी । मृगाक्षी । तन्वंगी । वाग्र
हणात् यमवदना इत्यादि । क्तिकारादक्तेरीप् वा वक्तव्यः । अंगुलिः अंगुली । ध ३७

लिः धूली । आजिः आजी । अक्तेरिति विशेषणात् कृतिः भूतिः । एवं मन्वादेः मन्वा
देर्गणात् स्त्रियामीप् प्रत्ययो भवति । ऐकारादेशश्च । मनायी । वृषाकपायी । मनुर्वृषा
कपिश्चैव अग्निः शतक्रतुस्तथा । कुसिदः कुसितश्चेति मन्वादिकथितो गणः । ए
मनोः स्त्री मनावी मनुः । वकारात् मनोरौ वा । पत्न्यादयः पत्न्यादयो निपात्यंते
पत्नी । अंतर्वत्नी । सखी । अशिश्वी । अईअरती । युवती । प्रती आदयः शब्दाः निपा
त्यंते । प्राची । दारशब्दो नित्यं बहुवचनांतः पुल्लिंगः । दाराः । दारान् । दारैः । दारेभ्यः । दा
रेभ्यः । दाराणां । दारेषु । हे दाराः । वोतोगुणात् । उकारांतात् गुणवाचिनो वा स्त्रियामी
प्प्रत्ययो भवति । पट्वी । पटुः । मृद्वी । मृदुः । तन्वी । तनुः । ऊतऊः । उकारांतात् स्त्रियामी
प्प्रत्ययो भवति । पंगूः । वामोरूः । करभोरूः । युनस्तिः । युवन्शब्दात् स्त्रियां तिप्प्रत्य
यो भवति । युवतिः । एभ्यो नामत्वात् स्यादयः । आबंतादापः । सिलोपः । ईवंतादसयः

१० सेर्लोपः पूर्ववत् रूपं नेयम् इति स्त्रीप्रत्ययाः अथ विभक्त्यर्थो निरूप्यते लिंगार्थे
प्रथमा धातुप्रत्ययातिरिक्तमर्थवच्छब्दरूपं लिंगनामनोरभेदात् नामैव लिंगं इति
केचित् नस्यैवार्थे सत्तामात्रे प्रथमा विभक्तिर्भवति लिंगादयोपि प्रथमार्था इति
केचित् ततः सतत्वस्य घटः वृक्षः १ अमोक्ते प्रथमा रविरिव राजते राजा रोषात् कु
मारी रोरूयते वीक्ष्यते भुवं भूपालः आगतास्तां रामलक्ष्मणौ । मनसि वचसि का
ये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयंतः परगुणपरमाणून्
पर्वतीकृत्य नित्यं निजविकहृदि संतः संति संतः कियंतः २ कुमारा शेरते स्वैरं रो
रूयंते कुमारिकाः गीयंते च गीतज्ञाः मेम्रीयंते रुजानिनाः ३ आमंत्रणे च आ
मंत्रणं आभिमुख्यीकरणे प्रथमा विभक्तिर्भवति मां समुद्धर गोविंद प्रसीद परमे
श्वरः कुमारि स्वैरं मा सा यक्षमध्वं भो तपस्विनः ४ भोसः भोस भगोस् अघोर् ३०

तेज्ञा स्वानिमासंते धि विषये क्षमस्व भो गुरो आराध्य भगोस्तुभ्यं नमोस्तु ते अघिषभो
महाप्राज्ञ तया घोस्त्व घस्मर ५ शेषाः कार्यकर्तृसाधनयोदानपात्रे विश्लेषाव
धौ संबंध आधारभावयोः शेषा विभक्तयो द्वितीयाद्यः एष्वर्थेषु भवंति कार्यं कर्म
कारके उत्साधो आप्यं संस्कार्यं विकार्यं च द्वितीया विभक्तिर्भवति यत् अप्रसत्वा
भावि न तु साध्यं यत्सिद्धमेव प्राप्यते न त्वाप्यं यत्र गुणाधानं मलापकर्षणं वा क्रि
यते तत्संस्कार्यम् यत्र पूर्वावस्थापरित्यागेनावस्थांतरोत्पत्तिः क्रियते तद्वि
कार्यं कटं करोति कारुकः रूपं पश्यति चाक्षुषः राज्यं प्राप्नोति धर्मिष्ठः सोमं
सुनोति सोमपाः अप्रति सर्वतः सौ कार्यो धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितांतेषु
ततो अत्रापि दृश्यते ६ अभितो ग्रामं नदी वहति सर्वतो ग्रामं तवो दृश्यंते धिग्
देवदत्तं उपर्युपरि ग्रामं ज्वाला आपतंति पुरोहितं उपर्युपरि पाचकाः पतंति व्या

१० धां॰ऽधिष्ठ आवंति नगरमधिऽधोति धानंदूरूपंते अधिः धियामं समपायामं प्रतिप्र
तियामं मुक्तमं भैक्ष्यं कालाध्वनोनैरंतर्ये कालवाचकाऽध्ववाचकाछ्ब्द नैरंतर्ये
ऽर्थे द्वितीयाविभक्तिर्भवति मासमधीयते क्रोशंपर्वतः नैरंतर्ये किं मासस्यद्विधी
ते क्रोशस्यैकदेशे पर्वतः कर्त्ता कर्म्म च करणं च संप्रधानं तथैव च अपादानाधिक
रणं इत्याहुः कारिकानिषट् कर्त्तरि प्रधाने क्रियाश्रये साधने च क्रियासिद्धुपका
रके करणेऽर्थे तृतीया विभक्तिर्भवति त्रिनेत्रद्वारेण रामेण रावणो लोकरावणः क
राग्रेण विदीर्णोपि वा र्नैर्बुध्यते पुनः १ दानपात्रे संप्रदानकारके चतुर्थी वेद
विदे गां ददाति छात्राय कन्यां ददाति विश्लेषो विभागस्तत्रयोवधिस्तत्तया व
स्तनया वा विवक्षितस्तत्रापादाने पञ्चमी धावतोऽश्वादपतत् हिमवतो गंगाऽव
तरति संबंधे षष्ठी संबंधिनोर्मध्ये प्रधानं यः तत्र षष्ठी राज्ञः स पुरुषो ज्ञेयः पि ३९

त्रोरेतत्प्रभंजनं गुरूणां वचनं पथ्यं कवीनां रसवद्वचः १ आधारे सप्तमी ष
ड्विधं ऽधिकरणं औपश्लेषिकं सामीपिकं अभिव्यापकं वैषयिकं नैमित्ति
कं औपचारिकं चेति कटे शेते कुमारोसौ वटे गावः सुशेरते तिलेषु विद्यते तै
लं हृदि ब्रह्मामृतं परम् १ युद्धे सन्नह्यते धीरोऽंगुल्यग्रे करिणां शतं भावः क्रि
यालक्षणं तत्रापि सप्तमी प्रसिद्धक्रियालक्षणं बोधनं भावः वर्षति देवे चोर
आयातः पतत्सु मालिनिपतितो राति अव्ययः विभक्त्यर्थो निरूप्यते विना
सहतमन्तरेण निर्धारणं स्वाम्यादिभिश्च एतैरपियो द्वितीयाद्याः विभक्तयो भव
ति विना पापं सर्वं फलति अंतरेण ह्रि किं जिवितेन अंतरा त्वां मां वधुः
इत्यादि सहसदृशसाकंसार्द्धं इत्यादियोगे तृतीया सह शिष्येणागतो गुरुः सद
शश्चैत्रो भैत्रेण साकं नयनाभ्यां पक्ष्मणां दंताः सार्द्धं धेनिभिर्धनैः साधुः न

२० मः स्वस्तिस्वाहास्वधाऽलंवषट्योगे चतुर्थी नमोनारायणाय स्वस्तिराज्ञे सोमा
० यस्वाहा पितृभ्यः स्वधा अलंमल्लोमल्लाय वषट्इंद्रा ऋतादियोगे पंचमी ऋते
ज्ञानान्नमुक्तिः ऋतेयोगे द्वितीया पि ज्ञानमृते विनायोगे तृतीया विज्ञानेन विना
अन्योगृहाद्विहारः निर्द्धारणं क्रियागुणजातिभिः समुदायात् पृथक्करणं ॥
तत्रषष्ठी क्रियापराणां मध्ये भगवतोऽराधकः श्रेष्ठः गवां कृष्णा गौः संपन्नक्षी
रा एतेषां क्षत्रियाः शूरतमः स्वाम्यादियोगे षष्ठीसप्तम्यौ स्वाम्यादियोगे सप्त
मीषष्ठीच गोषु स्वामी गवां स्वामी गोष्वधिपतिः गवामधिपतिः कर्तृकार्ययोर
क्तादौ कृतिषष्ठी कर्त्तरिकार्ये च षष्ठीविभक्तिर्भवति क्तादिवर्जिते कृदंते प्रयु
ज्यमाने आसस्य कृतिः भारतस्य श्रवणं स्मृतौ च कार्ये स्मृतौ धातौ प्रयुज्यमाने का
र्ये षष्ठीविभक्तिर्भवति मातुः स्मरति हेतौ तृतीया पंचमी च वक्तव्याः अनियमः उ ४०

वः कृतिः कृतेन कृतिकृत्वा त्राणभयहेतौ पंचमी च चौराद्बिभेति व्याघ्रात्त्रस्यति वि
युत्माताश्च किलः षष्ठिहेतुप्रयोगे च कस्य हेतोरियं कन्या अन्नस्य हेतोः इत्थंभावे
तृतीया अन्नस्यानेऽन्योपचारेण इत्थंभावः तस्मिन इत्थंभावे तृतीया विभक्ति
र्भवति शिष्यं पुत्रेण पश्यति संसारमसारेण पश्यति येनांगविकाराः येनांगेनांगि
नोंगविकारो लक्ष्यते तस्मात् तृतीया अक्ष्णा काणः पादेन खंजः कर्णेन बधिरः
शिरसा खल्वाटः मुखेन त्रिलोचनः कः शिवः वपुषा चतुर्भुजः विष्णुः जनिकर्तुः
प्रयोक्तव्याः जायमानस्य कार्ये सोपादानसंज्ञं भवति तत्रापादाने पंचमी प्रस्तिंडा
वृटोपायते यस्मात्प्रजाः प्रजायेन तत् ब्रह्मेति ऋणादियोगे पंचमी च प्रपाटलिपु
त्राद्दृष्टो देवः तादर्थ्ये चतुर्थी च वक्तव्या संयमाय श्रुतं धत्ते नरो धर्माय संयमं ध
र्मो मोक्षाय मे भावी धनं दानाय मुक्तये १ क्रुधधादियोगे च क्रुधाय कुप्यति मित्राय दु

१०

घ्रा गुणवते ऽस्पृयते । क्यप्लोपे कर्मण्यधिकरणे पंचमी वक्तव्या । हर्म्यात्प्रेक्षते ह
र्म्ये मारुह्य प्रेक्षते इत्यर्थः । निमित्तात्कर्मयोगे सप्तमी वक्तव्या । चर्मणि द्वीपिनं
हंति दंतयोर्हंति कुंजरं । केशेषु चमरीं हंति सिम्नि पुष्कलको हतः ॥ १ ॥ विषमे च म
के चतुरः । षष्ठी सप्तम्यौ चानादरे । वहूनां क्रोशतां गतः चौरः । वकुष साधुषु वं
दत्स्वपि स्वयमायेयाति साधुमार्गेण । वकु साधुषु निवारयेत्स्वपि स्वयमनार्यो
याति साधुमार्गेण । मातारुदतो । प्रव्रजति पुत्रः । अनोक्ते प्रथमा । यदिदं का
र्यत्वात्त्येन ख्यातेन कृता चोक्तं भवति जदा प्रथमा प्रयोक्तव्या । घटः क्रियते
पटः कार्यम् । छंदसि स्यादि सर्वेषां द्धातुर्हिति पुनं तु प्रस्तएस्पतिः । व्रजति वि
रिंजुः । कर्त्ता कर्म च करणं च संप्रदानं तथैव च । अपादानाधिकरणं इत्याहुः का
रिका षट् ॥ १ ॥ इति कारकप्रक्रिया समाप्तम् ॥ अथार्थवद्विभक्तिविशिष्टानां स ४१

ते
मासो निरूप्यते समासश्च न्वेनाम्नां पदानां अन्वययोगत्वे सत्येव समासो भवति । यत्रान्वात्तद्धि
तोपि न तो भार्या पुरुषस्य समासो न भवति । स च षड्विधः । अव्ययीभावस्तत्पुरुषो द्वंद्वो बहु
व्रीहिः कर्मधारयो द्विगुश्चेति । पूर्वपदप्रधानो अव्ययीभावः । तत्पुरुषो परपदप्रधा
नो द्वंद्वकर्मधारयो चोभयपदप्रधानौ वहुव्रीहिरन्यपदप्रधानस्तस्य क्रियाश्रि, संवधात्
उभयपदप्रधानो वलवान् एकपद्यमेकार्थ्यं एकविभक्तिकत्वं च समासप्रयो
जनं । स्त्री अधि इति स्थिते स्त्रीशब्दात् द्वितीयैकवचने अम् स्त्रियमधिकृत्य भवति
इति विग्रहे । अन्वययोगार्थसमर्थकः । पदसमुदायो विग्रहो वाक्यमिति यावत् । कृते स
मासे अव्ययस्य पूर्वनिपातो वक्तव्यः । पूर्वेऽव्ययेऽव्ययीभावः । अव्यये पूर्वपदे सति यो
न्वसोऽव्ययीभावसंज्ञकः समासो भवति इति समाससंज्ञा । समासप्रयोलुक् । समा
सेवर्त्तमानया विभक्तेप्रत्यये च परे लुग्भवति इत्यमो लुक् नामसंज्ञा स्यादिर्विभक्तिः

१० अधिस्त्री इति स्त्रियिंते । स नपुंसकं । सोऽव्ययीभावो नपुंसकलिंगो भवति । नपुंसकत्वात्
ह्रस्वत्वम् । श्रीराम । अव्ययीभावात् । अव्ययीभावात्परस्या विभक्तेर्लुग्भवति । अधि
स्त्रि गृहकार्यं । यापमति । अंनमतरिक्कुलम् । ह्रस्वादेशे संध्यक्षराणामिकारो वक्तव्यो
नावमतिक्रांतम् अतिनु । उपजलम् । यथा सादृश्ये । यथाशब्दो सादृश्ये वर्त्तमानः समस्यते
शक्तिमनतिक्रम्य करोतीति यथाशक्ति । अतोऽमनतः । अकारांतादव्ययीभावा
त्परस्य विभक्तेरम् भवति । अंतं वर्जयित्वा । कुंभस्य समीपे उपकुंभं वर्त्तते उपकुं
भं पश्य । वा टाङ्योः । टाङि इत्येतयोः परयो वा अम् भवति । उपकुंभेन कृतं । उपकुंभं दे
हि । उपकुंभादानय । अनत इति विशेषणात् संचम्पा अम् न भवति । उपकुंभं देशं । उप
कुंभं निधेहि । उपकुंभे निधेहि । आवधारणार्थे यावति च । अवधारणार्थे यावति शब्दे
प्रयुज्यमाने अव्ययीभावसंज्ञकः समासो भवति । यावंतमंत्राणि तावत्तो ब्राह्मणानि ४२

नामंत्रयस्वेति । यावदमंत्रं । मक्षिकाणामभावो निर्मक्षिकं वर्त्तते । पारे मध्ये षष्ठ्या वा
गंगायाः पारे पारेगंगम् इति अव्ययीभावः समादौ तत्पुरुषः । द्वितीयाद्यंते पूर्वपदे स
ति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति । ग्रामं प्राप्तो । ग्रामप्राप्तो । ग्रामप्राप्तः
दात्रेण छिन्नं । दात्रछिन्नं । यूपायदारुः । यूपदारुः । वृकेभ्यो भयम् । वृकभयं । राज्ञः
पुरुषः । राजपुरुषः । अक्षेषु शौंडः । क्वचिद्समाद्यंनस्य परत्वं वक्तव्यम् । अग्निः आहि
तः । आहिताग्निः । पूर्वस्मिन् भूत । भूतपूर्वः । समासे क्वचिदेकपद्येणत्वं हेतुः । शरा
णां वनं । शरवणं । आम्राणां वनं । आम्रवणम् । त्रीणि नयनानि यस्य स त्रिनयनः । पा
नस्य वा । सुरापाः पानं । सुरापाणं । सुरापानं । नञ् । नञ् पूर्वपदे सति योऽन्वयः स
तत्पुरुषसंज्ञकः समासो भवति । समासे सति नञो नकारस्य अनादेशो भवति स्व
रे परे नकादिवर्ज्जं । अश्वादन्यो अनश्वः । धर्माद्विरुद्धो अधर्मः । ग्रहणाभावो अग्र

२० एम् ॥ तस्मादस्यं भावश्च तदस्मत्वं तदस्तता ॥ अप्रासससमभावश्च तत्र यो षट्प्रकी
३ र्त्तिता ॥ तद्धिरूढ्ढ तत्रा वेष्टुतत्र वर्त्तते इति तत्पुरुषः ॥ चार्थे द्वंद्वः ॥ समुच्चयान्वाच
येतरेतरयोगे समाहाराश्चार्थाः तत्रेश्वरं गुरुं च भजस्वेति ॥ अस्य पेकमेकक्रिया
निसंबंधे समुच्चये तत्र समासो नास्ति ॥ भक्षो भिक्षामट गां चानयेति ॥ क्रमेणक्रिया
द्वयसंबंधेन्वाचये तत्र समासो नास्ति ॥ परस्परं संबंधात् ॥ अन्योन्यापेक्षएककि
यानिसंबंध इतरेतरयोगः संहतिसमाहारः ॥ इतरेतरयोगे समाहारे चार्थे द्वंद्वः
समासो भवति ॥ द्वंद्वेः स्वस्वरप्रधानेः इकारो कारांतानो पूर्वनिपातो वक्तव्यः ॥ प
टुश्च गुप्तश्च पटुगुप्तौ ॥ धवश्च खदिरश्च धवखदिरौ ॥ उक्तापी नामप्रयोगः ॥ अग्नि
श्च मारुतश्च अग्निमारुतौ ॥ भोक्ता च भोग्यश्च भोक्तृभोग्यौ ॥ स्त्री च पुरुषश्च स्त्री
पुरुषौ ॥ देवताद्वंद्वे पूर्वपदस्य दीर्घो वक्तव्यः ॥ अग्निषोमौ ॥ अग्नादे ॥ सोमादी ४३

नां षत्वं वक्तव्यं ॥ द्वंद्वस्यति इतरेतरयोगे द्विवचनं बहुवचने एकवद्भावो वा समा
हारो वक्तव्यः ॥ शशश्च कुशश्च पलाशश्च शशकुशपलाशाः शशकुशकाशपलाशं ॥
अन्योन्यं परस्परं एकत्वे द्विग्रहंद्वो एकत्ववर्त्तमानो द्विग्रहंद्वो नपुंसकलिंगो भव
तः ॥ संख्यापूर्वो द्विगुः ॥ संख्यापूर्वसमासो द्विगुर्निगद्यते समाहारे तद्धिपद्विगुः समा
हारेर्थे द्विगुसमासो भवति तत्तोकारांतादीप्प्रत्ययो भवति यस्य लोपः ॥ दशानां
ग्रामाणां समाहारो दशग्रामी ॥ पंचाग्नयः समाहृता इति पंचाग्निः ॥ पंचानां पात्रा
नां पात्राणां समाहारः पंचपात्रम् ॥ पंचानां गवां समाहारः पंचगुः ॥ नपुंसकत्वात्
ह्रस्वत्वं ॥ त्रयाणां फलानां समाहारः त्रिफले ति रुछिनः ॥ चतुर्णां युगानां समाहारः च
तुर्युगं ॥ त्रयाणां भुवनानां समाहारः त्रिभुवनं ॥ चतुः पथमित्यादौ ईप्प्रत्ययो न भव
ति ॥ इत्यादि ॥ बहुव्रीहिरन्यार्थे ॥ अन्यपदार्थप्रधानो यः समासः स बहुव्रीहिसंज्ञो

१० भवति॥ वहुधनं यस्य स वहुधनः॥ अस्तिधनं यस्य स अस्तिधनः॥ अव्यया पूर्वपदेव्य
८ मर्थे बहुव्रीहिरेव वक्तव्यः॥ अंतरंगं यस्य स अंतरंगः॥ बहिरंगः॥ उच्चैर्मुखः॥ तस्य
प्रधानस्यैकदेश विशेषणं न पायत्र ज्ञायते स तद्गुणसंविज्ञानो बहुव्रीहिः॥ लंबौ
कर्णौ यस्य स लंबकर्णः॥ बहुव्रीहौ विशेषणसप्तम्यंतयोः पूर्वे निपातो वक्तव्यः॥ चि
त्रा गौर्यस्य स चित्रगुः॥ करे धनं यस्य स करधनः॥ धनं हस्ते यस्य स हस्तेधनः॥
नेहादिभ्यः सप्तम्यंतस्य निपातो न भवति॥ चक्रपाणि इत्यादौ न भवति॥ चक्रं
पाणौ यस्य स चक्रपाणिः॥ इंदुः शेखरे यस्य स इंदुशेखरः॥ चंद्रः शेखरे यस्य स चंद्रशेख
रः॥ स च बहुव्रीहिर्द्विविधः॥ तद्गुणसंविज्ञानश्च अतद्गुणसंविज्ञानः॥ प्रियादीनां
वा॥ प्रिय॥ गुडः यस्य स प्रियः गुड॥ भुवने कीर्तिर्यस्य स भुवनकीर्तिः॥ पद्मनाभो यस्य
स पद्मनाभः॥ सिद्धासनप्रहरणादिषु न पूर्वे निपातः॥ प्रजामेधयोरसुक्॥ सोभना ४४

प्रभा यस्य स शुप्रभाः॥ सुमेधाः॥ धर्मादनत्॥ धर्मशब्दात्ः न प्रत्ययो भवति॥ सुधर्मा॥ रूपव
ती भार्या यस्य स रूपवद्भार्यः॥ अनार्थे स्त्रीलिंगस्यार्थे वर्तमानस्य ह्रस्वो भवति॥ पुं
वद्वा समासे सति समानाधिकरणे पूर्वस्य स्त्रीप्रत्ययस्य पुंवद्भवति॥ पुंवद्भावाद
पो निवृत्ति॥ वाग्रहणात् कल्याणी प्रियः इत्यादौ न भवति॥ गो॥ गौश्च ह्रस्वः॥ अनार्थे व
र्तमानस्य ह्रस्वो भवति॥ पंचगावो यस्य सः पंचगुः॥ संख्यासुमाघ्रादि पूर्वस्य पादश
ह्रस्वा लोपो वक्तव्यः॥ सहस्रं पादा यस्य सो सहस्रपात्॥ द्वौ पादौ यस्य स द्विपात्॥ शो
भनौ याद्वौ यस्या सो सुपात्॥ व्याघ्रस्य पादाविव पादौ यस्य स व्याघ्रपात्॥ असाद्धौ स्व
रे परे पदादेशश्च वक्तव्यः॥ चकारात् क्वचित्रासादि व्यतिरिक्तौ स्वरे परे पदादेशः॥
सहस्रपदः॥ सहस्रपदा॥ सहस्रपाद्भ्यां॥ सहस्रपाद्भिः॥ द्विपदः॥ द्विपदा॥ द्विपाद्भ्यां॥ द्वि
पाद्भिः॥ सुपदः॥ सुपदा॥ सुपाद्भ्यां॥ सुपाद्भिः॥ इत्यादि॥ टाउकः॥ समासे सति टः अउक

१० इसेनेषसमासाभवंति॥ टकारस्तत्पुरुषोज्ञेयः॥ अकारो द्वंद्वएवच॥ ककारस्तु बहुव्रीहि
डकारः सर्वतोमतः॥१॥ अचिंतोमहिमायस्य स अचिंतमहिमा॥ नोवा॥ नांतस्यपद
स्यटेलोपोभवति स्वरेमकारेचपरे॥ वाग्रहणान्नक्वचिन्नभवंति॥ उपधायालोपश्च
अक्कोमध्यंमध्यान्हः॥ क्वचिद्माद्यंतस्यपरत्वमितिवचनात्॥ अकः॥ सायं साया
न्हः॥ अन्हो अपरं॥ अपरान्हः॥ कवीनांराजा॥ कविराजा॥ टकारोनुबंधइत्यर्थ
कविराजा॥ राज्ञांपुरं॥ राजपुरं॥ वोक्कमनच्छ॥ वाग्मनसं॥ दक्षिणस्यांदिशिपंचा॥
दक्षिणपथः॥ अहश्चरात्रिश्च अहोरात्रम्॥ द्वौवात्रयोवापरिमाणमेषां द्वित्राः
पंचषट्प्रमाणमेषांपंचषा॥ बहवोराजानोयस्यांनगर्यांसा बहुराजनगरी बहुद ग
डिकानगरी॥ अत्रटिलोपेकृते॥ आवनः स्त्रियांइत्याप्॥ बहवः कर्त्तारोयस्यस ब
हुकर्तृकःपुरुषः॥ एकस्मिन्नर्थेनिष्ठाप्रवृत्तिर्यस्य तत्एकार्थनिष्ठंतस्मिन्सति ४५

कर्मधारयसंज्ञकः समासोभवति॥ कर्मधारयस्तुल्यार्थेपदद्वयेतुल्यार्थेएकार्थेनि
ष्ठेसति कर्मधारयः समासोभवति॥ नीलंचतदुत्पलंच नीलोत्पलं॥ रक्ताचासौल
ताचरक्तलता॥ पुमांश्चासौकोकिलश्च पुंस्कोकिलः॥ पुंसः॥ खयपसंयोगांतस्य
लोपोवक्तव्यः॥ नाम्नाचकृतासमासः॥ प्रादेरुपसर्गस्यनाम्नाचकृदंतेनसमासो
भवति सतत्पुरुषः॥ प्रवादः॥ कुंभकारः॥ प्रवाहः॥ ससहादेः॥ सादिः॥ समासेस
तिसहादीनांसादीर्भवति॥ पुत्रेणसवर्त्ततेसपुत्रः॥ सहसंतिरसांसध्रिसमिति
रयः॥ सहअंचतीति सध्र्यङ्॥ सम्यङ्॥ तिर्यङ्॥ कुत्सितेसदर्थे कुत्सितार्थेदिम
र्थेकत्वंकवकादेशाभवंति॥ कुत्सितंअन्नंकदन्नं॥ ईषदर्थेकदादिः॥ कुशब्दस्य
ईषदर्थेवर्त्तमानस्य कुतकवइत्येते आदेशाभवंति॥ कदुष्णंकवोष्णं कोष्णं॥ कालव
णं॥ पुरुषेवा॥ कापुरुषः॥ कुपुरुषः॥ कादरपुरुषः॥ इत्यर्थः॥ दंतस्यदत्तषट्सुत्वं

दस्संउत्वं॥ षोडन्॥ षोडश षोटा॥ बृहतांपतिः॥ बृहस्पतिः॥ महतष्टेरात्वं समानाधिकर
णे॥ महांश्चासौदेवश्च महादेवः॥ महांश्चासौईश्वरश्च महेश्वरः॥ द्योश्च भूमिश्च द्या
वाभूमिः॥ जायाच पतिश्च जंपतीः दंपती॥ जायाशब्दस्य जंदंभावो निपात्यते॥ इ
त्याकृतिगणोयं॥ क्वचित्तु क्वचित् क्वचित्समासे कृदंते पि तद्धिते विभक्तेलुग्भव
ति॥ देवानांप्रियमूर्खेपि॥ इतिमत्र देवप्रियः॥ कृच्छ्रान्मुक्तः॥ स्तोकान्मुक्तः॥ अप्सु
योनिरप्सुयोनिः॥ उरसिलोमा॥ हृदिस्पृक॥ कंठेकालः॥ वाचोयुक्तिः॥ दिशो
दंड॥ पश्यतोहरः॥ इत्यादि॥ समासे सति समानाधिकरणे शाकपार्थिवादीनाम
ध्यमपदलोपोवक्तव्यः॥ एकलिंग एकविभक्तौ कत्वं समानाधिकरणं॥ शाकः
प्रियः॥ पार्थिवः॥ शाकपार्थिवः॥ देवपूजको ब्राह्मणः॥ देवब्राह्मणः॥ आदिशब्दं द्वं
द्वसमासे सति पूर्वपदस्य लोपो भवति॥ माताच पिताच पितरौ॥ श्वश्रूश्च श्व ४६

शुरश्च श्वशुरौ॥ दुहिता पुत्रश्च पुत्रौ॥ ऋतां द्वंद्वे॥ द्वंद्वसमासे पूर्वपदस्य वा आत्वं
भवति॥ मातापितरौ॥ द्वंद्वे सर्वादित्वाज्जसी॥ वर्णाश्च आश्रमाश्च इतराश्च वर्णाश्रमे
तरे॥ वर्णाश्रमेतराः॥ व्येयधिकरणे बहुव्रीहौ मध्यपदलोपो वक्तव्यः॥ भिन्नार्थनिष्ठत्वे
सति भिन्नविभक्त्यंतपदवाचित्वम् व्येयधिकरणं॥ कुमुदस्य गंध इव गंधो यस्यासौ
कुमुदगंधिः॥ उपमानाच्च॥ उपमानात्परस्य गंधशब्दस्य इकारादेशो भवति॥ हंसस्य
गमनं इव गमनं यस्याः सा हंसगमना॥ दिक्संख्ये संज्ञायां॥ दिग्वाचि संख्यावाचि
शब्दौ संज्ञायां विषये समस्येते॥ तत्पुरुषसमासः॥ अविग्रहो नित्यसमासः
अस्वपदविग्रहोपि॥ दक्षिणाग्निः॥ सप्तग्रामाः॥ सप्तऋषयः॥ इति समासप्रक्रि
या॥ अथ तद्धितप्रक्रियानिरूप्यते॥ ॥ तेषां पूर्वोक्तानां नामपदानां अर्थांतरप्र
तिपादनत्वे हितः तद्धितः॥ अपत्ये अण्॥ नाम्नो अपत्येर्थे अण् प्रत्ययो भवति॥

२०
।

उपगोरपत्यमितिवाक्ये॥ उपगोः॥ अण् इति स्थिते॥ समासप्रत्यययोरिति षष्ठीलोपः
णकारो वृद्ध्यर्थः॥ आदिस्वरस्य ञ्णिति च वृद्धिः॥ स्वराणां मध्ये यः आदिस्वरस्तस्य
वृद्धिर्भवति॥ ञिति णिति च तद्धिते परतः॥ उकारस्य औकारो वृद्धिः॥ ओऽव्यस्वरे
उकारस्य ओकारस्य च अव भवति स्वरे यकारे च परे॥ औपगव॥ औपगवी॥ यस्य
लोपः॥ वसिष्ठस्यापत्यं वासिष्ठः॥ गौतमः॥ शिवादिभ्यश्चेति वक्तव्यः॥ शिवस्यापत्यं
शैवः॥ विदेहस्यापत्यं वैदेहः॥ ऋतुर् णि॥ मातृशब्दस्य ऋकारस्य उर् भवति अणि प
रे॥ षष्ठोणो मातरि॥ षण्णां मातॄणां अपत्यं षाण्मातुरः॥ क्वचित्रु सानां समान् इष्यत
द्वयोर्मात्रोरपत्यं द्वैमातुरः॥ बाह्वादेरिति इञ् वक्तव्यः॥ बाहविः॥ तिसृणां मातॄ
णां अपत्यं त्रैमातुरः॥ उपविंदोरपत्यं औपविंदविः॥ कृष्णस्यापत्यं कार्ष्णिः॥ वृष्णेर
पत्यं वार्ष्णिः॥ अन् इञ् नृषो॥ अकारान्तान्नाम्नो टषिशब्दादपत्येऽर्थे वाच्ये इञ् प्रत्ययो ५८

भवति॥ यस्येति अकारस्य लोपः॥ दैवदत्तिः॥ औधरिः॥ दाशरथिः॥ पौरंदरिः॥ ण्यायनण्
यण् एणी या गर्गनडात्रिस्त्रीपितृष्वस्रादेः॥ गर्गादेर्नडादेरत्रादेः॥ स्त्रीलिंगात्पितृष्व
स्रादेश्च॥ ण्य॥ आयन॥ एय॥ यण्॥ ईय॥ इमे ते प्रत्यया भवंति॥ अपत्येऽर्थे॥ गार्ग्यः॥ वा
त्स्यः॥ नाडायनः॥ चारायणः॥ आमुष्यायणः॥ यस्य लोपः॥ आत्रेयः॥ गांगेयः॥ मा
द्रेयः॥ पैतृष्वस्रीयः॥ मातृष्वस्रीयः॥ सवर्णादेरिञ् वक्तव्यः॥ सावर्णिः॥ सौमित्रिः
लुग्बहुत्वे क्वचित्॥ अपत्येऽर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचिद्विषये अन्यविवि
षये च लुग्भवति॥ गर्गाः॥ वत्साः॥ अत्रयः॥ विदेहाः॥ देवतेदमर्थे॥ देवतार्थे इदमर्थे
चैवोक्ताः प्रत्यया भवंति॥ इंद्रो देवता अस्येति ऐंद्रं हविः॥ सोमो देवता अस्येति
सौम्यं हविः॥ देवतार्थे इदमर्थे वा द्वयोर्देवता॥ क्वचिद्द्वयोः॥ क्वचित्सर्वपदानां त्वस्यो
वृद्धिर्भवति॥ अग्निमरुतौ देवता अस्येति आग्निमारुतं कर्म॥ इति द्वंद्वभावाः॥

र०
८

सोस्याः ।। अत्र भावे अण् वक्त वक्तव्य ।। णितो वा ।। उक्ता प्रत्यया विषयांतरे पि णितो
वा भवंति ।। अपो गोयेस्यासौ अजमः ।। शिवः ।। तस्येदं धनुः ।। आजगवं ।। अजगवं वा
कुमुदस्य गंधः स्वगंधो यस्येति स कुमुदगंधिः ।। तस्यापत्यं स्त्री कौमुदगंध्या ।। श्व
शुरस्यायं श्वाशुर्यं ग्रामः ।। विल्वोरिदं वैल्वं ।। गोरिदं गव्यम् ।। कुलस्येदं कुलं
त्वदीयं मदीयं ।। चतुरश्च लोपः ।। चतुरश्चादस्य वकारस्य लोपो भवति एवं लोप
योप[illegible]त ।। तुर्यं ।। तुरीयः ।। अमस्य दक् ।। अन्यत्रादस्य दगागमो भवति ।। ईप प्रत्
ये परे ।। अन्यस्य इदम् ।। अन्यदीयम् ।। अर्द्धजरतीयम् ।। कारकस्य क्रियायुक्ते कारका
दप्येते प्रत्यया भवंति ।। क्रियायुक्तो कर्त्तरि कर्मणि चेति ध्येयं ।। कुंकुमेन रक्तं वस्त्रं
कौंकुमं ।। मथुराया आगतः तत्र जातो वा माथुरः ।। ग्रामे भवो ग्राम्यः ।। धुरं वहतीति
धौर्यः ।। धौरेयः ।। केनेयेका ।। वहनिश्चय ईकर्सेते प्रत्यया भवंति ।। भवाद्यर्थेषु ।। ४१

णिलं चैषां अध्येकस्मिन्कं देशः ।। कर्णाटे भव कार्णाटकः ।। कर्णाटको वा ।। ग्रामादाग
तस्तत्र यातो वा ग्रामिणः ।। सध्रीचिनः ।। तिरश्चीनः ।। पलोयण्य वक्तव्य ।। कामायां
भव ।। कानिनः ।। कानिनो व्यासः ।। कर्णाश्च पुष्पेण युक्ता पौर्णमासी ।। पौषी ।। पौषी
ण ।। रूपो वा ।। क्षत्रे भवः ।। क्षत्रियः ।। क्षात्रः ।। सुक्रियं ।। इंद्रियं ।। तर्कं वेत्तीति तार्किकः
अक्षैर्दीव्यतीति आक्षिकः ।। शब्दं वेत्तीति शाब्दिकः ।। वेदस्य वधिनी क्रिया वैदि
की ।। स्यनतो ।। किमादेरवादेर्भवाद्यर्थे त्यचनो प्रत्ययो भवति ।। कुत भवः ।। कुत्रत्यः
कुतः भवः ।। कुतस्त्यः ।। कस्माद्भवः ।। कुत्रत्यः ।। तत्र भव तत्रत्यः ।। अद्य भवः ।। अ
द्यतनः ।। ह्यस्तनः ।। श्वस्तनः ।। सदा भवः सदातनः ।। स्वार्थेपि उक्ताः प्रत्ययाः स्वार्थेपि भ
वंति ।। देवदत्त एव दैवदत्तिकः ।। चत्वार एव वर्णाः ।। चातुर्वर्ण्यं ।। चोर एव चौरः
अव्ययः सर्वनाम्नां अक्क चपकलो ।। अव्यनां सर्वनाम्नां च टेः प्राक् अकच् प्रत्य

र०
२

योभवति उश्चके:पेका:॥ अणीनयोर्युस्मदस्मदोस्तवकादि:॥ तवइदम् तावकं
ममइदम् मामकं तव अयम् तवकिन ॥ मम अयं मामकीन: ॥ युष्माकं अयं यौष्मा-
क: ॥ अस्माकं अयम् आस्माक: ॥ युष्माकं अयं यौष्माकीन: ॥ अस्माकं अयम् ॥
आस्माकीन ॥ वतुल्ये ॥ तुल्ये सादृश्ये षष्ठ्यर्थे वत् प्रत्ययो भवति ॥ चंद्रेण तुल्यं चंद्रवन्मु-
खं चंद्रेण सादृशं चंद्रवन्मुखं ॥ घटेन तुल्यं घटवद्दृशं ॥ पटेन सदृशं पटवत्कं वस्त्रं
पटेन तुल्यं पटवत् ॥ भावे त्वतलयण: ॥ शब्दस्य प्रवृत्तिनिमित्तं भाव: तस्मिन् भावे
त्वतलयण इत्येते प्रत्यया भवंति ॥ ब्रह्मण: स्य भाव: ब्रह्मणता ॥ तांतस्य नित्यं स्त्री-
लिंगत्वादाप् समासेरितातणेण अग्नित्रेताजनता ॥ ब्रह्मणत्वं ब्राह्मण्यं ॥ सुमनसो
भाव: सौमनस्यं ॥ सुष्टुसौभूतो भाग: सौभाग्यं ॥ विदुष: भाव: वैदुष्यं ॥ कर्मण्यपि
यण्वक्तव्य: ॥ राज्ञ: इदं कर्म राजन्यम् राज्यम् ॥ नो वेति टिलोप: ॥ ब्रह्मणस्य क- ४९

र्म ब्राह्मण्यं ॥ लोहितादेर्डिमन् ॥ लोहितादेर्भावेऽर्थे इमन प्रत्ययो भवति ॥ स च डि-
त् ॥ डित्वात् टिलोप: ॥ लोहितस्य भाव: लोहितिमा ॥ अणिमा ॥ महिमा ॥ लघीमा
ऋर इमनि ॥ ऋकारस्य रत्वं भवति इमनि परे ॥ पृथोर्भाव: प्रथिमा ॥ दृढस्य
भाव: द्रढिमा ॥ बहोर्भाव: इति विग्रहे बहोर्लोपो भू च बहो: ॥ बहोरुत्तरे यो इम-
नादीनामिकारस्य लोपो भवति बहो: स्थाने भू चादेश: ॥ भूमा ॥ अस्त्यर्थे म-
तु: ॥ नाम्नोस्त्यर्थे मतुप्रत्ययो भवति ॥ अस्यास्मिन्वास्तीत्येतस्मिन्न
र्थे उकारो नुमर्थ: विधानार्थ: ॥ गौरस्यास्मिन्वा अस्तीति गोमान् ॥ श्रीमा-
न् ॥ गोमती ॥ इग्यकौ च मत्वर्थे वैजयंतीमाला ॥ अस्यास्मिन्वा अस्तीति विजि-
यंत: ॥ मायिक: ॥ मांतोपधाद्वत्विनौ मकारांतान्मकारोपधादकारांताद-

रोपधात् वत्विनौ प्रत्ययौ भवतः॥ अस्त्यर्थे भगं अस्ति अस्य असौ भगवान्
किंवान्॥ धनं अस्ति अस्य असौ लक्ष्मीवान् समं अस्ति अस्य इति रामवान्॥ ग्रा
मी॥ तडिदादिभ्यश्च॥ तडित् विद्यते यस्यासौ तडिवान् एतत्किंपतव्यपरिमा
णे वतुप त्तदोरा॥ यत्तदोष्टेरात्वम् भवति वतौ परे यावान् तावान्॥ किमः
कयश्च॥ किमशब्दस्य किरादेशो भवति वतौ परे चकाराद्वतो प्रत्ययवकार
स्य यकारादेशो भवति॥ कियान्॥ आ इदम्श्चेतदोवा॥ एतदोष्टेरात्वं भवव वतौ परे
यस्मिन्पक्षे आनभवति॥ तस्मिन्पक्षे एतद इश आदेशो भवति॥ आकारः सर्वा
देशार्थः॥ चकारात वतुप्रत्यय वकारस्य यकारः॥ एतावान्॥ इयान्॥ तुंदादरि
लः॥ तुंदिलः॥ उदरिलः॥ ओन्नते दंतात् उरः॥ उन्नता दंता॥ यस्यासौ दंतुरः॥ श्रद्धा ५०

द्लु॥ श्रद्धालुः॥ दयालुः॥ कृपालुः॥ अस्यायामेधास्रजो॥ स्त्वर्थे विनिर्वक्तव्यः
तपस्वी॥ मायावी॥ स्रग्वी॥ वाचो ग्मिन्॥ गकारो नमत्रतिषेधार्थः॥ वाग्मी॥ ए
कादाकिनीचासहाए एकशब्दादाकिनिप्रत्ययो भवति॥ एको विद्यते यस्यासौ
एकाकी॥ आलाटौ कुत्सितभाषिणि॥ कुत्सितवाक्॥ वाचालः॥ वाचाटः॥ ईसदप
रिसमाप्तौ कल्पदेश्यदेशीयाः॥ ईसदपरिसमाप्तः सर्वज्ञः॥ सर्वज्ञकल्पः
पटुदेश्यः॥ कविदेशीयः॥ प्रशंसायां रूपप्यप्रसस्तो वैयाकरणः रूपः॥ पाशः
कुत्सायां कुत्सितो वैयाकरणो वैयाकरणपाशः॥ भूतपूर्वे चरट्॥ पूर्वं दृ
ष्टः॥ दृष्टचरः॥ मातरि पितरि डामहच्॥ मातुः पिता मातामहः॥ स्त्री चेत् माता
मही॥ षकारो धावंऽनुबंधादीप्॥ पितुः पिता पितामहः॥ पितुः माता पिताम
ही॥ भ्रातरि व्य॥ पितुः भ्राता पितव्यः॥ प्राचुर्ये विकारप्राधान्यादिषु मयट्

२० अन्नमयोयज्ञः॥अन्नमयीघटः॥स्त्रीमयोयात्मा॥अमृतमयश्चंद्रः॥अदधि
तेवेदवेसूत्राणवक्तव्य॥व्याकरणमधीतेवेदवावैयाकरणः॥श्वोभनोऽ
श्वः॥स्वश्वस्य॥तंवेदेतिसौवश्वः॥नसंधिय्वोवुंडच॥संधिजोऽय्वौसंधिय्वौसंधि
य्वौतयोःसंधिजयोर्यकारवकारयोः॥संधिनःस्वरस्यवृद्धिर्नभवतिकिंतुतयो
र्युडागमोभवति॥इटउट॥इत्येतावागमौभवतः॥वर्णेविश्लेषंकृत्वायकारा
त्पूर्वंइकारः॥वकारात्पूर्वंमकारः॥पश्चादादिस्वरस्यञ्णितितिवृद्धिःइ
तोजानातीतिलज्जासंजाता॥अस्यलजित॥तरतमेयस्विष्ठाप्रकर्षे॥अतिश
येर्थेतरतमईयसुइष्ठइत्येतेप्रत्ययाभवंति॥अतिसयेनशुक्लः॥शुक्लत
रः॥शुक्लतमः॥इयस्विष्ठौडितौवक्तव्यौ॥डितिटेर्लोपः॥उकारोनुमविधा
नार्थः॥नसंमहतोऽधोदीर्घः॥संयोगांतस्यलोपः॥अतिसयेनलघुरितिल ५२

घीयान्॥लघीयसी॥लघीष्ठः॥अतिसयेनपापीपापीयान्॥पापीयसी॥पा
पिष्ठः॥गुर्वादेरिष्ठमीयसुगरादिश्च॥लोपश्च॥गुर्वादेर्गरादिआदेशाभवंति
इष्ठेमेन्निपसुइसोतेषुपरतः॥टिलोपश्चनभवति॥अतिशायेनगुरुः॥गरी
यान्॥गरिमा॥अतिशायेनप्रियः॥प्रेयान्॥प्रेष्ठः॥प्रेमा॥अतिशायेनस्थू
लः॥स्थवीयान्॥स्थविष्ठः॥ईलोपोज्याश्चबहुदीयसः॥ज्याशब्दात्परस्य
ईयसुइकारस्यलोपोभवति॥अतिसयेनवृद्धः॥वृद्धस्यज्यादेशः॥ज्यायान्
ज्येष्ठः॥अतिशायेनदीर्घः॥दीर्घस्याद्राघआदेशः॥द्राघीयान्॥द्राघीष्ठः॥वर्षि
ष्ठेपि॥अतिशायेनबहुः॥भूयिष्ठः॥भूयान्॥भूयसी॥अतिशायेनप्रशस्यः
प्रशस्यश्रआदेशः॥श्रेयान्॥श्रेष्ठः॥किमोव्याप्यादाख्यातात्च॥तरतमयोरा
मवक्तव्यः॥कुतस्तरांपरिमाणवस्तमां॥तेषांआरंभकत्वम्॥उच्चैस्तरांगाय

॥ ति॥ पचतितरां॥ पचतितमां॥ परिमाणे दघ्नादयः॥ परिमाणेर्थे दघ्नट् द्वयसट्
२ मात्रट् इत्येते प्रत्ययाः भवंति॥ जानुपरिमाणं जानुदघ्नम् जलं॥ शिरः परिमा
णं शिरोद्वयसं॥ पुरुषपरिमाणं पुरुषमात्रम्॥ द्वयोर्बहूनां चैकस्य निर्द्धारणे
किमादिभ्यो डतरडतमौ वक्तव्यौ॥ कतरो भवतोः काएवः॥ कतमो भवतां त्रि
के॥ भवतो यंतरस्त्वां किंकः॥ त्वतरउतरजहातु संख्येयविशेषावधारणे
द्वित्रिभ्यां तीयः॥ द्वयोः संख्यापूरणो भागः द्वितीयः॥ त्रेः संप्रसारणे तृतीयः॥
षट्चतुरोस्थः षष्ठः॥ चतुर्थः॥ पंचादेर्मः॥ पंचमः॥ सप्तमः॥ अष्टमः॥ नवमः
दशमः॥ एकादशादेर्डः॥ एकादशः॥ द्वादशः॥ त्रयोदशः॥ चतुर्दशः॥ अष्टादशः
विंशत्यादेर्वा तमट्॥ विंशतितमः॥ विंशतेर्डप्रत्ययः॥ अत्यादौ तिलोपः॥ पश्चा
दिलोपः॥ विंशः॥ शततादेर्नित्यं॥ शततमः॥ संख्यायाः प्रकारे धा॥ द्वौ प्रकारौ ५२

द्विधा॥ त्रिधा॥ चतुर्धा॥ एधोएववा॥ त्रेधा॥ द्विधा॥ द्वैधं॥ त्रैधम्॥ कतिपयभ्यां थ
कतिथः॥ कतिपयथः॥ क्रियाया आवृत्तौ कृत्वस्॥ पंच कृत्वः॥ सप्त कृत्वः
द्वित्रिभ्यां सुः॥ द्विरुक्तं॥ त्रिरुक्तं॥ चकादेशस्य वकुवारिणि॥ वकुशः॥ तया
यडौ संख्यायां॥ द्वितयं॥ त्रितयं॥ द्वयं॥ त्रयम्॥ शेषाः निपात्याः॥ कात्यादयः
॥ इति तद्धितप्रक्रिया सर्वादि संपूर्णम्॥ संवत् १८८२ आशाढ कृष्ण ९ शुक्रे
लिखितं भट्ट कृशाल पुस्तक गुशांईजी श्री इच्छापुरीजी तत् शिष्य रामेतपुरी पठनार्थं ५३

R.K.N.S.U. LIBRARY RAMTEK

```
[OrderDescription]
,CREATED=22.10.20 11:35
,TRANSFERRED=2020/10/22 at 11:47:21
,PAGES=52
,TYPE=STD
,NAME=S0004362
,Book Name=M-819-TAGHIDATPRAKIRIYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
```

```
FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,
```